पूर्वकाले महाबाहो ये प्रजापतयोऽभवन् ।
तान्मे निगदतः सर्वानादितः शृणु राघव ॥ ६
कर्दमः प्रथमस्तेषां विकृतस्तदनन्तरम् ।
शेषश्च संश्रयश्चैव बहुपुत्रश्च वीर्यवान् ॥ ७   G 3 20 7 B 3 14 7 L 3 19 7

13

D8 begins with ॐ, T2 with श्रीरामार्पण, M1 with श्रीरामाय नम

1 [ab]) G1 अतरे (for अन्तरा) Ś1 D2 पचवटीं तु गच्छतावत्तरे (D2 °रा) रघुनदनौ, Ñ V B D1 3 5 7 पच (D3 °चा) वटीं तु गच्छतमतरा रघुनदन —After 1[ab], D3 ins

230* राम कमलपत्राक्ष सयुगेष्वपलायिनम् ।
महापक्षो महातुण्ड पिशिताशी महाबल ।

—Ñ1 illeg for [c] —[c]) Ś1 Ñ2 V B1 3 4 D1–3 5 7 महागृध्रो, B2 महान्गृध्रो, M2 महागृध्र (for °काय) —[d]) Dm1 -पराक्रम Ś1 Ñ V B D1–3 5 7 M3 जटायुरिति विश्रुत (M2 °त)

2 Ñ2 V B D5 7 om 2 —[a]) Ś1 D2 तु, D1 च, D3 [अ]थ (for तौ) M2 तु दृष्ट्वा (for दृष्ट्वा तौ) G1 महाबाहू (for °भागौ) M2 reads from महा up to 3[b] in marg *sec m* —[b]) Ś1 D1–3 वनस्थौ, Dg1 Dm1 D4 8 T2 3 G2 M1 2 Cv g वटस्थ (for वनस्थ) —For 2[cd], Ś1 D1–3 subst

231* मेनाते राक्षस गृध्र तदा चैवाभ्यधावताम् ।
ब्रुवाणौ को भवानेव तिष्ठ तिष्ठ निशाचर ।

[(l 1) D1 मत्वा तौ, D3 मन्येते (for मेनाते) —(l 2) Ś1 इति, D2 अत्र (for एव)]

3 M2 reads 3[ab] in marg *sec m* (cf v l 2) Ñ1 illeg up to प्रीय in [b] (see v l) —[a]) Ś1 D2 ततो, D3 स त, D8 om तौ (subm) (for स तौ) Ñ2 V B D5 7 स राम श्लक्ष्णया वाचा —[b]) Ñ2 reads सौम्यया in marg Ś1 सयमानया, Ñ V B D1–3 5 7 प्रीय (Ñ1 illeg) माणया (for प्रीणयन्निव) —[c]) B2 बधु (for वत्स) M3 reads वत्स मा in marg *sec m* M2 चेत्थ (for विद्धि)

4 [a]) Dt1 सत D1 पितु (for पितृ-) Ñ2 D5 7 ज्ञात्वा, V B Dt1 D6 मत्वा (for बुद्ध्वा) —[b]) Ś1 Ñ1 D1–3 पूजयित्वा सलक्ष्मण (Ś1 स राघव), L(ed) पूजयित्वा च राघव —[c]) M2 चास्मै (for तस्य) Ñ1 D3 तस्मै स्वकुलमव्यग्रम्, D1 2 M3 तस्मै कुशलमव्यग्रम् —[d]) Ñ1 D1–3 M2 3 आचचक्षे स्वनाम च (D3 तु मानद), M1 अथापृच्छत्स्वनाम च ❀ Cv स तस्य कुलमव्यग्रमथ पप्रच्छेति सम्यक् पाठ ❀ —For 4[cd], Ś1 Ñ2 V B D5 7 subst , while D3 ins after 4

232* कुशलानामय चैनमपृच्छद्विनयान्वित ।
आत्मन सभव तात सतति कुलमेव च ।
कथयेत्यथ स प्राह राम कौतूहलान्वित ।

[(l 1) Ś1 B2 3 (m also as above) [ए]वम्, D3 [ए]व (for [ए]नम्) D3 पप्रच्छ प्रतिपूजयन् (for the post half) —Ś1 om (hapl) l 2–3 —(l 2) V1 प्रभव (for सभव) D3 सपूज्यैनमपृच्छच्च कुलसततिसभव —(l 3) D3 राम कौतूहलात्तत्र तदा सौमित्रिणा सह]

5 [a]) Ñ B1–3 D1 3 तु वच , V D5 च वच (for वचनं) D4 T1 2 transp [b] and [d] —[b]) Ś1 Ñ V B D1–3 5 7 स्वकुल (D2 कुशल, D7 स कुल) जन्म चात्मन —[c]) Ś1 Ñ2 V B1–3 D5 7 द्विजश्रेष्ठो, B4 स्ववृत्तात (for द्विजस्तस्मै) —[d]) G1 -समुद्भव Ś1 Ñ2 V B D5 7 यथानत्परिपृच्छते (Ś1 Ñ2 V2 B2 3 °त), D1 सर्वं श्रुत यथाद्भुत, D2 सर्वमुत्तममद्भुत, D3 सर्वं तु कृतमद्भुत ❀ Cr सर्वभूतसमुद्भव, आचचक्ष इति शेष । आत्मान आत्मना चेत्यर्थ ।, Ck रामस्य वचनं श्रुत्वेति । वचन नाम प्रश्नविषयक वचनमित्यर्थ । सर्वभूतसमुद्भवमाचचक्ष इति प्रसगादिति शेष । आत्मान आत्मनाम चेत्यर्थ ❀

6 [a]) Ś1 Ñ V B D1–3 5 7 आदिकाले —Ñ2 reads 6[b] in marg —[b]) D7 येभवन्ब्रह्मण सुता —[c]) V1 B1 D1 2 तन् (for तान्) B3 (*sup lin* also as in text) सर्वम् (for सर्वान्) —[d]) Ś1 आदत (for आदित)

7 [a]) B1 राम (for तेषा) —[b]) Ś1 Ñ2 V1 (m also विक्रातस्) B1 2 4 D1–4 8 G1 3 M विक्रीतस् , B3 विक्रीडस् , Dm1 विक्रीदस् , D5 7 विक्रातस् , G2 चिक्रीतस् (for विकृतस्) Ñ2 Dg1 D4–7 T1 2 G1 M3 अनतर (for अनन्तरम्) —[c]) Ś1 सुव्रतश्चैव, Ñ V B D1 2 5 7 सु (B3 स) व्रतश्चैव, Dm1 D8 G3 M1 2 सुश्रवाश्चैव, D3 बहुपुत्रस्तु (for सश्रयश्चैव) —[d]) D3 सुव्रतश्चैव, D6 वक्षुपुत्रश्च, G3 बहुपुत्रस्य (for बहुपुत्रश्च) M1 बहुपुत्र प्रतापवान्

G 3 20 8
B 3 14 8
L 3 19 8

स्थाणुर्मरीचिरत्रिश्च क्रतुश्चैव महाबलः ।
पुलस्त्यश्चाङ्गिराश्चैव प्रचेताः पुलहस्तथा ॥ ८
दक्षो विवस्वानपरोऽरिष्टनेमिश्च राघव ।
कश्यपश्च महातेजास्तेषामासीच्च पश्चिमः ॥ ९
प्रजापतेस्तु दक्षस्य बभूवुरिति नः श्रुतम् ।
षष्टिर्दुहितरो राम यशस्विन्यो महायशः ॥ १०
कश्यपः प्रतिजग्राह तासामष्टौ सुमध्यमाः ।
अदितिं च दितिं चैव दनूमपि च कालकाम् ॥ ११
ताम्रां क्रोधवशां चैव मनुं चाप्यनलामपि ।
तास्तु कन्यास्ततः प्रीतः कश्यपः पुनरब्रवीत् ॥ १२

---

8 D5 om (hapl) 8 —ᶜ) Ś1 Ñ2 V B D7 पुलहश्च (for चाङ्गिराश्च) Ñ1 D1–3 सत्यश्रवा (Ñ1 °व्रत·) पुलस्त्यश्च, D7 पुल॰ ॰हश्चैव (om hapl) —ᵈ) Ś1 Ñ2 V B D7 चैव वीर्यवान् (for पुलहस्तथा)

9 ᵃ) V1 B1–3 (m also as in text) 4 Dm1 D7 8 G3 अवरो (for अपरो) —ᵇ) Ś1 च वीर्यवान्, B1 G2 तथैव च (for च राघव) —ᶜ) Dg1 S Cv r काश्यपश्च, Cm g कश्यपश्च (as in text) D3 G1 2 तु (for च) Ś1 Ñ2 V B1 3 4 D2 5 7 महाभागस्, B2 D1 3 °भाग (for °तेजास्) —ᵈ) Ś1 D1–3 तु, Ñ1 illeg (for च) Ñ1 पचम (for पश्चिम) Ñ2 V B D5 7 आसीदपश्चिम

10 ᵃ) Ñ1 illeg for प्रजापतेस्तु Ś1 Ñ2 V2 B1 D5 7 च (for तु) —ᵇ) Dt1 D6 T3 विश्रुता, D4 T1 2 विश्रुत, G2 न श्रुत (for न श्रुतम्) —ᶜ) Ś1 तस्य, G1 नाम (for राम) —ᵈ) Ñ1 V B M2 यशस्विन, Ñ2 D5 महाव्रता, B3 (also) D2 मनस्विन, T2 3 M1 3 महायशा (for महायश) Ś1 D3 तपस्विन्यो यशस्विन, D7 यशस्विनो महाव्रत (sic) —After 10, [V1 D1–3 ins, while Ś1 Ñ V2 B Dm1 D5 7 8 G2 3 M2 3 ins l 3 only after 11ᵃᵇ

233* ताभ्यो धर्माय पत्न्यर्थे ददौ दश सुमध्यमा ।
त्रयोदश सुता वीर मारीचेस्तु परिग्रह ।
अङ्गिराश्चापरा राम कन्या प्रत्यङ्गिरास्तथा ।
शेषा धर्मश्च सोमश्च तथैवान्ये महर्षय ।
विंशतिश्चापरा सप्त दक्ष सोमाय वै ददौ ।
अन्या ऋषिभ्य प्रददौ दश कन्या सुतेजस ।
धर्मस्त्वजनयत्पुत्रान्साध्याया द्वादशाच्युतान् ।
साध्यान्देवान्रघुश्रेष्ठ देवेभ्योऽपि परान्दिवि ।
वसवोऽष्टौ वसोर्धर्माज्जातास्त्रैलोक्यपूजिता ।
धार्यते यैर्जगत्सर्वं सहस्थावरजङ्गमम् ।
विश्वाया जज्ञिरे विश्वे दक्षक्रतुमुखा दश ।
मरुत्वत्या मरुत्वन्तो भानवो भानुजा स्मृता ।
लम्यापुत्र स्मृतो घोष सकल्पाया सनामक ।
मुहूर्ताया स्मृतास्त्रिंशन्मुहूर्ता लोकपूजिता ।
साम्या वीथ्या स्मृता पुत्रास्त्रय पन्थान एव च ।
पृथिवीविषय सर्वं मरुन्धत्या व्यजायत ।
कन्या सोमस्य या प्रादाद्दक्ष प्राचेतस प्रभु ।
सर्वा नक्षत्रयोगिन्यस्तासा पुत्रास्तु दीप्तय ।

[(l 1) D2 पत्न्यर्थं (for पत्न्यर्थे) —V1 D1 2 om l 3 and 4 —(l 3) Dm1 D3 8 M2.3 अगिरास्तु, G2 3 अगिरस्तु (for अङ्गिराश्च) D3 M2 [अ]पर (sic) (for [अ]परा) Ñ1 D3 तासा (for कन्या) Dm1 D8 G2 3 M2 3 कन्या प्रत्यग्रहीत्तदा (for the post. half) —(l 5) D3 विंशतिं D2 सोमाय प्रददौ तदा (for the post half) —(l. 6) D1 सुचेतस (for सुतेजस) —(l 7) D2 च (for तु) V1 [अ]सुतान्, D3 [अ]च्युत (for [अ]च्युतान्) —(l 8) D1 देवेभ्योप्यधिकान्दिवि, D2 देवेभ्योपि तत परान् (for the post half) —(l 9) D1 च धर्माया, D2 च धर्मज्ञास् (for वसोर्धर्माज्) D2 तथैते लोकपूजिता (for the post half) —(l 10) D2 वे (for यैर्) V1 सदमव् (hypm), D3 महत्- (for सह-) —(l 11) V1 राम (for विश्वे) V1 देवा क्रतुमया दश (for the post half) —(l 12) D1 transp भानवो and भानुजा —(l 13) V1 लबापुत्रा स्मृता घोरा (for the prior half) D1 सकधाया (for सकल्पाया) V1 सनायक, D3 सनातन (for सनामक). —(l 14) V1 त्रयस् (for स्मृतास्) V1 -विश्रुता (for -पूजिता) —(l 15) D1 नास्या (for साम्या) V1 याम्या रिथ्य, D2 याम्यायाश्च (for साम्या वीथ्या) —(l 16) D3 पृथिव्या विषम सर्वं (for the prior half). D1 2 मरुत्वत्या (for मरुन्धत्या) D3 अजायत —(l 18) D1 सर्व- (for सर्वा) D1 सु- (for तु)] —After 10, M2 ins

234* ददौ स दश धर्माय काश्यपाय त्रयोदश ।
सप्तविंशति सोमाय चतस्रोऽरिष्टनेमिने ।
द्वे चैव बहुपुत्राय द्वे चैवाङ्गिरसे तथा ।
द्वे कृशाश्वाय विदुषे दत्ता दक्षस्य कन्यका ।

11 For subst in V1 D1–3 cf v l 12 Dg1 reads 11ᵃᵇ in marg —ᵃ) Dt1 Dm1 D4 6 T1 2 G M काश्यप B3 (after corr) प्रीति- (for प्रति-) —ᵇ) Ñ2 D5 7 अष्ट- (for अष्टौ) Ñ1 illeg for सु- Ś1 V2 च पच च (for सुमध्यमा) —After 11ᵃᵇ, Ś1 Ñ V2 B Dm1 D5 7 8 G2 3 M2 3 ins l 3 of 233* —ᶜ) Ś1 अदितिश्च दितिश्चैव —ᵈ) D6 दनुम् Dm1 D8 G3 [अ]थ (for च) Dg1 Dm1 D4 8 T1 2 G M1 कालिका Ś1 Ñ2 V B1–3 D5 7 कालका दनुमे(Ś1 °रे)व च, Ñ1 दनू चैवाथ कालिका, B4 कालका च दनू तथा

12 ᵃ) L(ed) क्रौंचवशा (for क्रोधवशा) —Ñ1 illeg for 12ᵇ —ᵇ) M3 दनु (for मनु) M2 [अ]मलाम् (for [अ]नलाम्) Ś1 Ñ2 V B D5 7 बलामतिबलामपि(Ś1 °ला तथा) —For 11–12ᵇ, D1–3 subst, while V1 subst l 1 only for 11ᵃᵇ

पुत्रांस्त्रैलोक्यभर्तॄन्वै जनयिष्यथ मत्समान् ।
अदितिस्तन्मना राम दितिश्च दनुरेव च ॥ १३
कालका च महाबाहो शेषास्त्वमनसोऽभवन् ।
अदित्यां जज्ञिरे देवास्त्रयस्त्रिंशदरिंदम ॥ १४

आदित्या वसवो रुद्रा अश्विनौ च परंतप ।
दितिस्त्वजनयत्पुत्रान्दैत्यांस्तात यशस्विनः ॥ १५
तेषामियं वसुमती पुरासीत्सवनार्णवा ।
दनुस्त्वजनयत्पुत्रमश्वग्रीवमरिंदम ॥ १६

G 3 20 17
B 3 14 16
L 3 19 18

235* या कन्या प्रतिजग्राह कश्यपो भगवान्प्रभु ।
नामानि तासां सर्वाणि शृणु राम महामते ।
अदितिर्दितिर्दनु प्रावा अरिष्टासुरसाखगा ।
सुरभिर्विनता कद्रुस्ताम्रा क्रोधवशा इरा ।
प्रावापुत्रा महासत्त्वा धर्मनिष्ठा सुयाजका ।

[(l 2) D2 सर्वासां D2 महाबल (for °मते) —(l 3) Prior half hypm D2 चैव (for प्रावा) D2 खशा क्रोधवशा इरा (for the post half) D3 अदितिं दितिं दनुं प्राच्यामरिष्टां सुरसां मुनिं —(l 4) D2 ताम्रा(before corr भद्रा)नायुर्मुनि कद्रु सुरभिर्विनता सुधा, D3 सुरभिं विनतां कद्रुं ताम्रां क्रोधवशामिव —D2 3 om l 5]

—c) Ñ1 illeg for तास्तु Ś1 पत्न्यो (for कन्यास्) Ś1 Ñ2 V B D3 5 7 भृशं, Ñ1 D2 तदा, D1 तप (sic) (for तत) D1 सर्वा, M3 प्रीता (for प्रीत) —d) Dg1 Dt1 Dm1 D4 6 8 S काश्यप Ś1 Ñ2 V B D1 2 5 7 वाक्यम्, D3 G1 M3 पतिर् (for पुनर्) Ñ1 illeg for प पुनर

13 a) D2 M2 -कर्तॄन्, G2 -भोक्तॄन् (for -भर्तॄन्) Ś1 मे, G1 च (for वै) D1 पुत्रांस्त्रिलोकभर्तॄंश्च —b) Ñ1 सुस्थिरान्, D2 दुर्धरान् (for मत्समान्) Ś1 Ñ2 V B1-3 D5 7 मत्त (B1 दत्त, L[ed] सत) सजनयिष्यथ, B4 मत्तश्च सजनयिष्यथ (hypm), D1 जनयिष्यत सुस्थिरान् —After 13ab, Ś1 V2 B4(m) ins

236* इति भर्ता वरं तासां प्रादात्तु प्रीतमानस ।
[V2 B4 सुप्रीतमानस (for तु प्री°)]

—c) D8 तनया (for तन्मना) B2 D3 राजन् (for राम) —d) Ś1 Ñ2 V B Dg1 D1-3 5 7 T3 G1 2 मनुजर्षभ, Ñ1 मनुरेव च (for दनुरेव च)

14 a) Dg1 Dm1 D4 8 T1 2 G M1 2 Cg कालिका (for कालका) G1 महाभाग (for °बाहो) Ś1 Ñ V B D1 2 5 7 दनुश्च (Ñ1 illeg after दनुश्च up to b) कालका(Ś1 °कश्च) चैव, D3 दनुश्चैव महाभागो —b) Ś1 Ñ2 V B D1-3 5 7 M2 3 शेषा विमनसो (for शेषास्त्वमनसो) —d) Dm1 अरिंदम

15 b) T2 M3 ह्यश्विनौ (for अश्विनौ) —c) Dm1 हि (for तु) —For 14c-15, S1 N V B D1-3 5 7 subst, while G1 subst l 1-2 for 14c-15b

237* अदितिर्जनयामास त्रयस्त्रिंशत्सुरान्सुतान् ।
आदित्यांश्च वसूंश्चैव रुद्रांश्चैवाश्विनावपि ।
दितिस्तु जनयामास दैत्यांश्चैव यशस्विन ।

[G1 transp l 1 and 2 —(l 1) Ñ1 D1-3 G1 जनयद्देवान् V B2-4 सुतान्सुरान् (by transp), B1 शतान्सुतान्, G(ed) शुभान्सुरान् (for सुरान्सुतान्) Ñ1 त्रयस्त्रिंशत वै सुतान्, D1 आदित्याञ्जगदीश्वरान्, D2 आदित्याञ्जगति श्रुतान्, D3 त्रयस्त्रिंशत ईश्वरान्, G1 त्रयस्त्रिंशदरिंदमान् (for the post half) —D1 2 om l 2 —(l 2) V1 सुतांश्चैव (for वसूंश्चैव) Ś1 Ñ2 उभौ (for अपि) Ñ1 D3 G1 आदित्यान्सवसून्रुद्रानश्विनौ चैव राघव —(l 3) Ś1 Ñ1 B3 4 च (for तु) Ñ1 D3 पुत्रान् (for दैत्यांश्) Ñ V B1 2 D3 5 7 तात, D1 2 सह (for चैव) Ñ2 V1 D5 7 तपस्विन, B2 यशस्विनी, D1 2 मरुद्गणै (for यशस्विन)]

16 a) Ś1 Ñ1 V B D1-3 येषाम् —b) Ś1 Ñ V B D5 7 पुरा(Ñ1 illeg after रा, B1 °त्रा)सीत्स(Ś1 Ñ2 B2 °त्सु)-महार्णवा, D1-3 पुरा सवनकानना, G3 पुरासितवनार्णवा —B1 transp 16cd and 17ab —c) T3 मनुस् S1 Ñ2 V1 B1 4 D5 7 च (for तु) D1 2 पुत्रान् (for पुत्रम्) —d) Ś1 अश्विग्रीवम् (for अश्व°) B1 अनुत्तम, D5 7 अरिंदम (for अरिंदम) D1 2 विप्रचित्ति(D1 °त्रि)मुखान्बहून् ⁂ Cv दैत्यान्दिति । तादृशौ नरककालकौ कालका, दनुरश्वमदश्वग्रीवमेकं पुत्रं मनुरल्पबलायुषो मनुष्यान् अन्यास्तु तिर्यक्पक्षिस्थावरान् जनयामासु । श्येनी श्येनांश्च गृध्रांश्च व्यजायत सुतेजस । धृतराष्ट्री तु हंसांश्च कलहंसांश्च सर्वश इति पाठक्रम (as in text) ⁂ —After 16, D1 2 ins, while V1 ins after 17ab

238* खसापुत्रौ स्मृतौ रौद्रौ सध्ययोर्यक्षराक्षसौ ।
दारुणत्वाद्धि कालस्य निसर्गेण तु दारुणौ ।
विरूपौ विकृतौ तीक्ष्णौ सर्वसत्त्वभयंकरौ ।
महास्वनौ महासत्त्वावन्तर्धानचरावुभौ ।
असृङ्मांसवसाहारौ नक्तं चैव बलीयसौ ।
तयो पुत्राश्च राजेन्द्र बहवो रात्रिचारिण ।
अनायुष स्मृता पुत्रा बलपुत्रादयो गता ।
महाकाया महामायास्त्रैलोक्यस्य भयंकरा ।
मुने पुत्रास्तु बहुशो गन्धर्वाप्सरसां गणा ।
अन्याश्चाप्सरसो दृष्ट्वा यज्ञे देवनमस्कृता ।
प्राजापत्य तु गन्धर्वा जज्ञिरे कोपनोत्तमा ।
कामक्रोधवशा सर्वे दर्पिणो रावणादय ।
अनेकशतसाहस्रा बलवन्तस्तपस्विन ।

[(l 1) D1 खगापुत्रौ, D2 खशा° —(l 2) D2 च (for हि) D1 2 च (for तु) —(l 4) D1 महासुरौ (for महास्वनौ) —(l 6) D1 2 पौत्राश्च (for राजेन्द्र) —(l 7) D1 2 बालवृद्धा (D2 बलवृत्रा)दयोद्भुता (for the post half) —(l 8) D1 महावीर्यास् (for °मायास्) D2 महामाया महाकायास् (by transp)

G 3 20 17 B 3 14 17 L 3 19 18 नरकं कालकं चैव कालकापि व्यजायत ।
क्रौञ्ची भासी तथा श्येनी धृतराष्ट्री तथा शुकीम् ॥ १७
ताम्रापि सुषुवे कन्याः पञ्चैता लोकविश्रुताः ।
उलूकाञ्जनयत्क्रौञ्ची भासी भासान्व्यजायत ॥ १८

श्येनी श्येनांश्च गृध्रांश्च व्यजायत सुतेजसः ।
धृतराष्ट्री तु हंसांश्च कलहंसांश्च सर्वशः ॥ १९
चक्रवाकांश्च भद्रं ते विजज्ञे सापि भामिनी ।
शुकी नतां विजज्ञे तु नताया विनता सुता ॥ २०

(for the prior half) D2 त्रैलोकस्य —(l 9) D1 सुवपुषो, D2 सुवहुशो (for तु वहुशो) —(l 10) D1 [ऽ]रिष्टा, D2 शिष्टा (for दृष्टा) V1 यज्ञदेव- (for यज्ञे देव-) —(l 11) D1 2 प्राजापत्यानि (for प्रजापत्य तु) D1 गायनोत्तमा , D2 गायनक्षमा (for कोपनोत्तमा) —(l 12) D1 2 राम क्रोधवशापत्य (for the prior half) D1 वानरादय , D2 वनचारिण (for रावणादय) —(l 13) D1 2 तरस्विन (for तपस्विन)]

17 B1 transp 16^{cd} and 17^{ab} D1 2 om 17^{ab} —^{a}) Dm1 D8 T2 M1 कालिक, D3 G2 कालिका, G3 कालका (for कालक) Ś1 कालकजाश्च, Ñ1 कालका कन्या, Ñ2 कालकजैश्च, V1 कालखजाश्च, V2 M3 कालकेयाश्च, D5 7 कालकज च (for कालक चैव) —^{b}) Ñ1 मानव सा, Dg1 कलिकापि, Dm1 D4 8 T1 2 G M1 2 कालिकापि, D3 दानव सा (for कालकापि) M3 व्यजीजनत् Ś1 कालनेमिमजीजनत् , Ñ2 V B D5 7 कालका समजीजनत् .—After 17^{ab}, V1 ins 238*, while D3 ins

239* ताम्रा तु सुषुवे कन्या पञ्च राम निवोध मे।

V1 D1 2 transp 17^{cd}–20 and 21^{ab}–28 (including star passages) Ś1 repeats 17^{c}–18^{b} after 254* —^{cd}) D5 7 क्रौंची श्येनी तथा भासी (by transp) (for ^{c}) G3 धार्तराष्ट्रीं (for धृत°) Ś1 (both times) V1 B2–4 क्रौंची भासी(B2 4 °पी) तथा श्येनी धृतराष्ट्री तथा शुकी (V1 भासी भासानजायते)

18 Ś1 repeats 18^{ab} (cf v l 17) For sequence in V1 D1 2, cf v l 17 —^{a}) Ś1 (both times) Ñ1 D1 2 ताश्चापि, Dt1 D6 T2 3 ताम्रा तु, D3 ताम्रैव (for ताम्रापि) Ś1 Ñ1 D2 सुषुवु. (for °वे) —^{c}) S1 V2 B2–4 D5 7 क्रौंचान जनयत् , Ñ2 B1 क्रौंचाश्चाजनयत् —^{d}) G3 हासी हासान् (for भासी भासान्) Ś1 Ñ2 V2 B1–3 D7 अजायत, B4 D5 अजीजनत् —For 18^{cd}, D1–3 subst , while Ś1 ins after 18^{ab} (r)

240* भासीपुत्रा स्मृता भासा मयूरा काककुक्कुटा ।
उलूकाश्च कपोताश्च तित्तिरा लावकास्तथा।

[(l 1) Ś1 D2 तथा (for स्मृता) D1 माया (for भासा) D1 काककुक्करा —D3 om l 2 —(l. 2) Ś1 लावुकास् (for लावकास्)]

whereas V1 subst for 18

241* मयूरान्कुक्कुटान्गृध्रानुलूकांस्तित्तिरानपि।
कपोतानपि सजज्ञे वलाकाश्च तथैव च।

19 For sequence in V1 D1 2, cf v l 17 —^{a}) Dg1 श्वेनी श्वेनाश् —^{b}) Ś1 Ñ2 V2 B D5 7 तयोलूकानजायत, Ñ1 D3 जन ,द् (D3 °यत्य)मितौजस , V1 D2 सप्रजज्ञे मितौजस , D1 सजज्ञे अमितौजस (with hiatus) —^{cd}) Ñ1 D1 6 T2 M3 च (for तु) Ñ1 D1–3 भामिनी (for सर्वश) V1 सजज्ञे जलचारिण (for ^{d}) Ś1 Ñ2 V2 B D5 7 धृतराष्ट्री त्व(Ñ2 D5 7 चा)जनयद्धसाञ्जलविहा(B2–4 °चा)रिण

20 For sequence in V1 D1 2, cf v l 17 —^{a}) B3 भद्रा तु, D7 om ते(subm) (for भद्र ते) —^{b}) Dm1 D8 च, T3 सु- (for [अ]पि) Ś1 Ñ2 V B D5 7 सारसाश्चैव सर्वश , Ñ1 प्रजज्ञे वापि सर्वश , D1–3 प्रजज्ञे उ(D2 चौ, D3 [with hiatus] ओं)दकान्द्विजान् —^{c}) Dm1 D8 G3 विजज्ञे सा, G1 च जज्ञे तु, M1 2 व्य(M2 वि)जनयन् (for विजज्ञे तु) —^{d}) Dg1 D6 T नताया D6 विनती (for विनता) —For 20^{cd}, S1 Ñ V B D1–3 5 7(l 1 only) subst

242* शुकी शुकानजनयत्तनयान्विनयान्वितान् ।
कल्याणगुणसपन्नान्सर्वलक्षणपूजितान् ।

[(l 1) Ñ1 D1 2 विजज्ञेय, D3 विजनयत् (for अजनयत्) D1 om (hapl) for विनया Ś1 D3 गरुडान्विनता तथा, Ñ2 D5 7 तनयान्विश्रुतास्तथा, V B3 4 D2 तनयान्विनता(B4 °ता) तथा (D2 सुतान्) (for the post half) —(l 2) V1 repeats l 2 after l 2 of 243* D1 -सयुतान् , D3 -पूजिता (for -पूजितान्)]

—Thereafter V1 D1 2 cont , Ś1 cont after 240*

243* एते वै सुमहावेगान्गरुडान्पन्नगाशिन ।
क्रौञ्ची वाध्रीणसाञ्जज्ञे कुररान्सारसान्वकान् ।
स्थलजांश्चैव भद्र ते पक्षिणो जलजानपि ।
कालकाया ह्यनाधृष्य कालकेयगणो महान् ।
महारौद्रो महाभीम सर्वसत्त्वभयकर । [5]
दक्षो दैवतविद्वेषी ब्रह्मदत्तवरोऽशिव ।
एव विश्वस्य जगतो दाक्षायिण्यो हि मातर ।

[Ś1 om l 1. —(l 1) V1 सुमहाभागा, D1 °वेगा (for °वेगान्) D1(after corr) गहना (for गरुडान्) V1 गरुड पन्नगाशन (for the post half) —(l 2) V1 वाध्रीनस जज्ञे V1 तथा (for वकान्) —After l 2, V1 repeats l 2 of 242* D1 om l 3–4 —(l 3) S1 जलजाश् (for स्थलजाश्) Ś1 प्रजज्ञे चोदकान्द्विजान् (for the post half) —(l 4) Ś1 कालकायात्मजोधृष्य (metri causa) V1 काल्काजनय(त्)प्रक्ष कासकेयास्तथा । . —(l 6) Ś1 दृप्त. —(l 7) V1 हि सर्व- (for विश्वस्य) Ś1 दाक्षायण्यो]

दश क्रोधवशा राम विजज्ञेऽप्यात्मसंभवाः ।
मृगीं च मृगमन्दां च हरीं भद्रमदामपि ॥ २१
मातङ्गीमथ शार्दूलीं श्वेतां च सुरभीं तथा ।
सर्वलक्षणसम्पन्नां सुरसां कद्रुकामपि ॥ २२
अपत्यं तु मृगाः सर्वे मृग्या नरवरोत्तम ।
ऋक्षाश्च मृगमन्दायाः सृमराश्चमरास्तथा ॥ २३
ततस्त्विरावतीं नाम जज्ञे भद्रमदा सुताम् ।
तस्यास्त्वैरावतः पुत्रो लोकनाथो महागजः ॥ २४
हर्याश्च हरयोऽपत्यं वानराश्च तपस्विनः ।
गोलाङ्गूलांश्च शार्दूली व्याघ्रांश्चाजनयत्सुतान् ॥ २५ G 3 20 26 B 3 14 25 L 3 19 28

21 For sequence in V1 D1 2, cf v l 17 —[a]) Ś1 Ñ V1 B D1 3 5 7 तथा, D2 अथ, M2 Cvp तत , M3 नव (for दश) Ñ1 B1 2 D3 7 G1 2 नाम, V1 पापा (for राम) D1 2 दश क्रोधवशापत्य —[b]) D4 T1 2 G1 2 हि, M च (for ऽपि) Dm1 D8 G2 M [आ]त्मसभवान् Ś1 Ñ V2 B D3 5 7 जज्ञे सा चा(Ś1 शाखा)त्मसभवान् , V1 D1 2 दश कन्या कुलोद्वहा —V1 om 21[cd] —[c]) Ñ1 D6 मृगी च, D8 मृगा च —[d]) Dg1 हारीं, Dm1 D8 G1 2 M1 हरि (for हरीं) Dg1 भद्रमथामपि, T3 भद्रमथापि च —For 21[cd], Ś1 D1-3 subst

244* मृगी च मृगमन्दा च हरिभद्रा मतङ्गिका ।

[D3 मृगवृदाश्च (for °मन्दा च) D2 हरी (for हरि-) D1 हरीभद्रा मता तथा, D3 हरिमदामजामपि (for the post half)], while Ñ2 V2 B D5 7 subst

245* मृगीं मृगवती चैव शार्दूली क्रोष्टुकी तथा ।

[B1 2 मृगी मृगवती Ñ2 V2 B1-3 D5 शार्दूली क्रोष्टुकी(B1 °ष्ठिकी, D5 °ष्टुकी)]

22 For sequence in V1 D1 2, cf v l 17 —[a]) Dg1 मतगीम् D4 T1 2 G2 अपि (for अथ) —[b]) Dg1 स्वरभीं, Dm1 D4 6 8 G2 M2 3 सुरभि —For 22[ab], Ñ V B D3 5 7 subst

246* मातङ्गी सिहिका चैव श्वेता सुरभिरेव च ।

[D5 मातगा D5 7 सिहिका (for सिंहिका) Ñ1 V1 D3 मातगी त्व(V1 °गीर, D3 °गीम)थ शार्दूली(Ñ1 °ली) (for the prior half) Ñ V D3 5 7 श्वेता Ñ D3 5 7 सुरभिम् (for °भिर्)] —[c]) B1-3 D3 7 सपन्ना —[d]) V2 B1-3 D3 M2 सुरसा (for सुरसां) Ñ2 V2 B4 D5 7 च यशस्विनी, B1-3 च यशस्विनी, D3 च तपस्विनी (for कद्रुकामपि) —For 22, Ś1 D1 2 subst , while V1 subst for 22[cd]

247* भूता च कपिशा दंष्ट्रा श्वेता च सरमा तथा ।
सुरसा चैव ताभ्यो हि जज्ञिरे विपुला प्रजा ।

[(l 1) V1 कपिला (for °शा) Ś1 सरसा, V1 सुरसा, D1 सुरमा (for सरमा) —(l 2) V1 इवायाश् (for सुरसा) Ś1 चापि (for चैव) Ś1 [ऽ]पि (for हि) V1 D1 बहुला (for विपुला)]

23 For sequence in V1 D1 2, cf v l 17 —[a]) Ñ1 D3 च (for तु) —[b]) Ñ1 D3 नरवरात्मज —[c]) Ñ1 D3 ऋक्षास्तु, V1 शबरा, L(ed) गवया (for ऋक्षाश्च) D6 मृगमेदाया (for मृगमन्दाया) —[d]) Dg1 शृमराश्, D6 8 सु° (for सृमराश्) —For 23, Ś1 D1(l 1 only) 2 subst , V1 subst l 1 for 23[ab] and ins l 2 after 23

248* मृगापत्य मृगा सर्वे हरिणैणा शशास्तथा ।
वराहा महिषा खड्गा उष्ट्रा गौरमुखास्तथा ।,

[(l 1) V1 D1 2 मृग्यपत्य V1 हरिणेया (for °णैणा) Ś1 हरिणैणाञ्शशास्तथा (for the post half) —(l 2) V1 वराहगजमहिषा (for the prior half) V1 उष्ट्र], while Ñ2 V2 B D5 7 subst

249* मृग्या पुत्रा मृगा सर्वे तत्र तासा परतप ।
मृगवत्यास्त्वथर्क्षाश्च सृमराश्च तथा विभो ।

[(l 1) B3 मृगा (for मृग्या) B1 सुता (for पुत्रा) V2 मृग्या पत्य(sic) B1 तामा भद्रा (for तत्र तासा) —(l 2) B3 मृगवत्या V2 B तथर्क्षाश्च (for त्वथ°) V2 मृगराश्च (for सृमराश्च). B3 प्रभो (for विभो)]

24 For sequence in V1 D1 2, cf v l 17 According to Cg, the sequence of st 24–26 is 25[ab], 24, 26[ab], 25[cd], 26[cd]. —[a]) Dg1 [इ]रावति, Dm1 D8 G1 [इ]रावती, M1 [अ]रा° (for [इ]रावती) —[b]) T3 भद्रमदा Dg1 जज्ञे भद्रमथात्मजा —[c]) Dg1 ततस्त्विरावत —For 24, Ś1 Ñ1 V1 D1-3 subst (Ś1 V1 D1 2 read after 252*)

250* ततस् वैरावण नाम नाग भद्रा व्यजायत ।
स तु सर्वगुणोपेतो गजेन्द्र· शक्रवाहन ।

[(l 1) Ś1 D2 तथा (for ततस्) Ś1(with hiatus) एरावण, D1 चैरावण, D2 वैश्रवण (for स्वैरावण) Ñ1 हरिभद्रा , D2 नारी भद्रा, D3 हरिमदा (for नाग भद्रा) —(l 2) Ñ1 सप्तगणोपेतो (for सर्वगुणो°)],

while Ñ2 V2(l 1 only) B D5 7 subst for 24

251* गजमैरावत नाम मातङ्ग्यजनयत्सुतम् ।
ऐरावणात्पुनर्जाता मृगमन्दादयो गजा ।

[(l 1) B4 नागम् (for गजम्) B ऐ(B2 चै)रावण (for °वत) B3 चैव (for नाम) B4 D5 7 मातगी जनयत्सुतम् (for the post half)]

25 For sequence in V1 D1 2, cf v l 17, for Cg, cf v l 24 —[a]) Ś1 V1 D2 3 G2 तु (for च) —[b]) Ñ1 Dm1 D3 4 8 M2 तरस्विन (for तप°) Ś1 V1 D1 2 गोलागूलास्तु रक्षस (D1 °श्च रिक्षव , D2 °स्तरक्षव) Ñ2 V2 B D5 7 वानरा

G 3 20 26
B 3 14 26
L 3 19 29

मातङ्ग्यास्त्वथ मातङ्गा अपत्यं मनुजर्षभ ।
दिशागजं तु श्वेताक्षं श्वेता व्यजनयत्सुतम् ॥ २६
ततो दुहितरौ राम सुरभिर्द्व्यजायत ।
रोहिणी नाम भद्रं ते गन्धर्वीं च यशस्विनीम् ॥ २७
रोहिण्यजनयद्गा वै गन्धर्वी वाजिनः सुतान् ।
सुरसाजनयन्नागान्राम कद्रूश्च पन्नगान् ॥ २८
मनुर्मनुष्याञ्जनयत्कश्यपस्य महात्मनः ।
ब्राह्मणान्क्षत्रियान्वैश्याञ्शूद्रांश्च मनुजर्षभ ॥ २९
मुखतो ब्राह्मणा जाता उरसः क्षत्रियास्तथा ।
ऊरुभ्यां जज्ञिरे वैश्याः पद्भ्यां शूद्रा इति श्रुतिः ॥ ३०
सर्वान्पुण्यफलान्वृक्षाननलापि व्यजायत ।
विनता च शुकीपौत्री कद्रूश्च सुरसास्वसा ॥ ३१

भुवि विश्रुता —^{c}) Ñ B1 2.4 Dt1 D6 8 गोलाङ्गूलांश्च —^{d}) Ñ2 V2 B D5 7 व्याघ्रानजनयत Dg1 marg, D6 सुत (for सुतान्) —For 25^{cd}, Ś1 V1 D1 2 subst

252* सिंहा व्याघ्रा जम्बुकाश्च द्विपिनो नकुलास्तथा ।
सर्पा मूषकमार्जारा दर्दुराश्च महाबला ।
श्वेत चैव महाकाय वारण दैत्यदारणम् ।

[(l 1) V1 सिंहव्याघ्राश्च जम्बुका (for the prior half) V1 खरा, D1 खगा (for तथा) —(l 2) V1 च खर, D2 मूषीक- (for मूषक-) V1 D1 महाभुजा —(l 3) V1 D1 श्वेतवाहन, D2 दत्यदारुण]

—Thereafter Ś1 V1 D1 2 read 250*

26 For sequence in V1 D1 2, cf v l 17 For sequence in Cg, cf v l 24 —^{a}) D1 मातङ्गयाम् (for मातङ्ग्यास्) Ś1 D2 सर्व-, D1 अथ, G1 M1 त्वपि (for त्वथ) D5 7 मातङ्गो Ñ1 मातङ्गास्त्वथ मातङ्गी, V1 मातङ्ग्याश्च तथापत्य, Dm1 D3 4 8 T2 G3 M2 मातङ्गास्त्वथ मातङ्ग्या (by transp), G(ed) मातङ्ग्यपि च मातङ्गान् —^{b}) Ś1 D2 जज्ञिरे, V1 मातङ्गा, D5 7 M2 ह्यपत्य (to avoid hiatus) (for अपत्य) Ś1 Ñ V B1-3 D1-3 5 7 पुरुषर्षभ, G2 मनुजेश्वर (for मनुजर्षभ) —^{cd}) Ś1 V1 Dm1 D2 6 दिशा गज, Dg1 दिशो गजाश्, D4 T दिशागजाश् (for दिशागज) Ś1 V1 श्वेताख्य, Ñ1 शखाख्य, Dg1 Dt1 Dm1 D4 6 8 T G3 काकुत्स्थ (for श्वेताक्ष). D6 श्रुता (for श्वेता) Dg1 Dm1 T2 G2 [अ]-व्यजनयत्, D1 2 स्वज°; D3 चाज° D4 T सुतान् (for सुतम्) V1 श्वेतानुजनयत्सुतान् (for ^{d}) Ñ2 V2 B D5 7 दिग्गज चैव शखाख्य श्वेता वै समजायत —After 26, Ś1 V1 D1 2 ins a passage relegated to App I (No 4)

27 For sequence in V1 D1 2, cf v l 17 —^{a}) Ś1 Ñ1 V1 D2 3 तथा, D1 उभे (for ततो) Ś1 Ñ1 V1 B1 3 D2 M3 दुहितरो, D3 चेदुतरो (sic) (for दुहितरौ) —^{b}) Ś1 सुषुवे सुरभी वने, Ñ1 V1 D1-3 सुरभी सुषुवे परा (V1 प्रजा, D1 वने, D2 3 वरे), Ñ2 D5 7 सुरभिस्तु व्यजायत, V2 B सुरसापि व्यजायत, G M सुरभी (G2 M2 °भिर्) द्वे व्यजायत —^{c}) Ś1 Ñ1 V1 B2 रोहिणी, D5 रौहिणी, D6 रोहिणा, D7 रोहणी Ñ2 V2 B D5 7 चैव (for नाम) V1 कद्रुश्च, G(ed) भद्र च (for भद्र ते) —^{d}) Ś1 B1 D5 गधर्वांश्, V1 B2 D1 ग(V1 गा)धर्वी, Dt1 D2 6 गधर्वा Ś1 V1 B2 D1 2 5 यशस्विनी

28 For sequence in V1 D1 2, cf v l 17 Ś1 om (hapl) 28^{ab} —^{a}) Dg1 Dt1 Dm1 D3 4 6 8 G1 3 M2 3 Cr t गावो, D1 यज्ञा, D2 गाश्च, Cgp as in text (for गा वै) Ñ V1 B D5 7 रोहिण्या (V1 B1 °ण्या) जज्ञिरे गावो (Ñ1 °श्च). —^{b}) Ñ1 V1 Dt1 D1-4 गधर्वा, B D5 7 गवर्व्यां (for गन्धर्वी) Ñ1 V1 D1 2 (before corr) 3 सुता, Ñ2 V2 B D5 7 तथा (for सुतान्) —^{c}) M1 नाग, M3 damaged (for नागान्) —^{d}) B2-4 Dg1 M2 3 कद्रुश्च Dg1 Dm1 D4 8 T G1 3 M तु (for च) —For 28^{cd}, Ś1 V1 D1 2 subst

253* कद्रूश्च नागान्सजज्ञे शेषवासुकितक्षकान् ।
कर्कोटकमहापद्मौ कुलमुख्यांस्तथा परान् ।
पञ्च कन्याश्च नाम्नाया जाता रघुकुलोद्वह ।

[(l 1) V1 कद्रुश्च Ś1 शेषतक्षकवासुकीन् (for the post. half) —(l 2) D1 महापद्मान् (for °पद्मौ) —(l 3) Ś1 ता राजन्, V1 श्वेतान् (for नाम्नाया) Ś1 ख्याता (for जाता)], while Ñ1 D3 subst for 28^{cd}

254* नागाना सुरसा जज्ञे सहस्र भीमकर्मणा ।
कद्रूश्च पन्नगाञ्जज्ञे बहून्नाम महाबला ।

—After 254*, Ś1 repeats 17^{c}–18^{b}

29 ^{ab}) Ś1 Ñ1 D1-3 असृजद् (for जनयत्) Dg1 Dt1 Dm1 D6 8 T3 G2 3 M1 3 काश्यपस्य Ś1 Ñ1 V1 D1-4 T1 2 G1 M2 राज (D3 4 T1 2 G1 °म) पुरान् (M2 °न) यशस्विन. (for ^{b}) Ñ2 V2 B D5 7 मनुर्मनुष्यांश्च तथा जनयामास राघव —^{d}) B पुरुषर्षभ D3 शूद्रांश्चैव द्विजर्षभ

30 D4 T1 G1 2 om 30 —^{a}) Ś1 Ñ1 V B Dg1 D3 5 7 T3 शिरसो, D1 2 शिरस्तो (for मुखतो) —^{b}) Ś1 V1 Dm1 D2 3 8 Ctp बाहुभ्या (D2 °त.), B3 4 D1 उरस्त, G3 भुजाभ्या (for उरस) Ñ2 V2 B2 3 D5 7 भुवि, V1 D3 स्मृता (for तथा) Ś1 क्षत्रियस्तथा, B1 4 क्षत्रियो भुवि —^{d}) Dm1 G3 विनिसृता, D8 विनिश्रुता, T2 M1 इति श्रुत, M2 3 इति स्मृता —For 30^{cd}, Ś1 Ñ V B D1-3 5 7 subst

255* जाताश्चाप्यूरुतो वैश्या शूद्राणा जन्म पादत ।

[Ś1 वैश्यास्त्वूरुजाताश्च, Ñ1 वैश्यानप्यूरुजानाहु, D1 उर्वोश्च वैश्या सभूता, D2 3 वैश्या अप्यूरुतो जाता (for the prior half)]

31 Ś1 D1 2 om 31^{a}–32^{b} —^{a}) Dm1 D4 T1 M3 Cgp पिड-, T3 वीत- (for पुण्य-) Ñ2 V2 B D5 7 सस

कद्रूर्नागसहस्रं तु विजज्ञे धरणीधरम् ।
द्वौ पुत्रौ विनतायास्तु गरुडोऽरुण एव च ॥ ३२

तस्माज्जातोऽहमरुणात्संपातिश्च ममाग्रजः ।
जटायुरिति मां विद्धि श्येनीपुत्रमरिंदम ॥ ३३

सोऽहं वाससहायस्ते भविष्यामि यदीच्छसि ।
सीतां च तात रक्षिष्ये त्वयि याते सलक्ष्मणे ॥ ३४

जटायुषं तु प्रतिपूज्य राघवो
मुदा परिष्वज्य च संनतोऽभवत् ।
पितुर्हि शुश्राव सखित्वमात्मवा-
ञ्जटायुषा संकथितं पुनः पुनः ॥ ३५

स तत्र सीतां परिदाय मैथिलीं
सहैव तेनातिबलेन पक्षिणा ।
जगाम तां पञ्चवटीं सलक्ष्मणो
रिपून्दिधक्षञ्शलभानिवानलः ॥ ३६   G 3 20 37 B 3 14 36 L 3 19 61

इति श्रीरामायणे अरण्यकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

पिंडफलान्(B1 °कुलान्) वृक्षान्, V1 पुण्यान्सर्वफलान्वृक्षान् —^{b}) Ñ2 B4(also as in text) D5 7 इरा च, V1 ललना, B1 बाला च (for अनला) —After 31^{ab}, Dm1 D8 G3 M3 ins

256* जज्ञे राम महाबाहो ताश्च सर्वान्महीरुहान् ।

—Ñ1 D3 om 31^{c}–32^{b} Ñ2 V B D5 7 transp 31^{cd} and 32^{ab} —^{c}) Ñ2 V B D5 7 G2 M2 तु, G1 [अ]पि (for च) G(ed) श्येनी (for शुकी-) Ñ2 V B D5 7 जज्ञे (for -पौत्री) —^{d}) B2 M2 कद्रुश्च, B3 4 कद्रु च Dm1 सरसा-, G2 सुरसु- (for सुरसा-) M3 (before corr तदा) -सुता, Ct सुते (for -स्वसा) Ñ2 V B D5 7 सुरसा (B3 4 °सा) सुता(B1 तथा) G(ed) अन्यै सह सुतै सुता

32 Ś1 Ñ1 D1–3 om 32^{ab} (cf v l 31) Ñ2 V B D5 7 transp 31^{cd} and 32^{ab} —^{a}) V1 रुद्रनाग-, M2 कद्रुर्नाग- B4 G1 3 -सहस्र च, M3 °स्रास्तु (for -सहस्र तु) Dm1 D4 8 T1 2 Cg कद्रूर्नाग सहस्रास्य —^{b}) M1 2 जज्ञे सा (for विजज्ञे) Dt1 D6 धरणीधरान्, Cg as in text (for °धरम्) Ñ2 V B D5 7 जनयामास भूध(B4 °च)र —^{c}) Ś1 Ñ1 D2 3 च, D1 यौ (for तु) Ñ2 V B D5 7 विनताया सुतौ राम —^{d}) Ś1 Ñ V B D1–3 5 7 जज्ञाते(Ś1 D1 2 कथितौ) गरुडारुणौ

33 ^{a}) Ñ2 V B D5 7 [ऽ]स्मि गरुडात् (for ऽहमरुणात्) —^{b}) Ś1 D1 सपाती च, Dg1 T3 °ति स, D2 साम्पाती च, G2 °तिस्तु Ñ2 V1 चाग्रजो मम (by transp) V2 B D5 7 सपाती चाग्रजो मम —After 33^{ab}, Dg1 reads 34^{cd} —^{c}) Ś1 Ñ2 V B D1 2 5 7 जटायुष तु(Ś1 V B2 3 D1 च) (for जटायुरिति) M1 2 मामाहु (for मा विद्धि) —^{d}) Ñ2 D5 7 मुनिपुत्रम् (for श्येनी°)

34 ^{a}) V1 सोय, L(ed) योह (for सोऽह) Ś1 D1–3 M3 राम, Ñ V1 B1 3 4 D5 7 वत्स, B2 बधु (for वास-) G1 मया सह वसेह त्व —^{b}) G1 सहाय ते (for भविष्यामि) V1 यदृच्छया, Dg1 G2 यदिच्छसि —After 34^{ab}, Dm1 D4 8 T1 2 G3 ins

257* इद दुर्गं हि कान्तार मृगराक्षससेवितम् ।

—Dg1 reads 34^{cd} after 33^{ab} —^{c}) Ñ2 V2 B2–4 D5 7 तथेह, B1 तथैव, Dg1 तु तात (for च तात) —^{d}) Ñ2 D5 7 सुसे, B शून्ये (for याते) V1 सलक्ष्मण —After 34, Ś1 V1 D1–3 ins

258* तव पित्रा महाबाहो सगत मे दृढव्रत ।
भवान्सख्यु सुतो मह्य भवति प्रीतिमानहम् ।
स त खग परिष्वज्य पूजयित्वा पुन पुन ।
उवाच रामो धर्मात्मा यथा त्व तात मन्यसे ।

[(l 1) V1 सखित्व (for सगत) Ś1 D2 [ऽ]भवदृढ, V1 महत्कृत (for दृढव्रत) —(l 2) V1 भवान्सखिसुतोसाकं (for the prior half) Ś1 D2 भवन्हि (for भवति) —(l 3) V1 सलक्ष्मण (for पुन पुन)]

35 ^{a}) M2 त (for तु) Ś1 Ñ1 D2 3 तथेति(Ś1 °थैव) त वै(Ñ1 D3 स) परिगृह्य राघवो, Ñ2 V1 B D5 7 तथेति त तु (Ñ2 D5 7 तत्र, B1 कृत्वा) प्रतिगृह्य राघवो —^{b}) D1 तदा (for मुदा) D3 om च Ś1 तथैव तोपयन्, Ñ2 V B D5 7 च त खगोत्तम, D2 च समतोभवत् (for च सनतोऽभवत्) —^{c}) M1 2 च (for हि) Ś1 Ñ V B D1–3 5 7 M1 आत्मन —^{d}) D3 जटायुना Ñ1 सकथनात्, Dm1 D8 सत्कथित (for सकथित) Dt1 om (hapl) one पुन —After 35, V1 erroneously reads from सलक्ष्मणो in l 2 up to दिधक्षु in l 4 of 259*

36 ^{a}) Dm1 G3 राम, D8 राम (sic) (for सीता) Ś1 Dg1 Dt1 Dm1 D3 6 8 T2 3 G1 3 Ct*p* परिधाय, V B4 °वार्य, B3 T1 °हाय, B3 °गृह्य (for °दाय) G2 स तत्र सीतासहितो रघूत्तम —^{c}) Ś1 Ñ1 D1–3 जगाम पचा(D3 °च)वटिमु-

१४

G 3 21 1
B 3 15 1
L 3 20 1

ततः पञ्चवटीं गत्वा नानाव्यालमृगायुताम् ।
उवाच भ्रातरं रामो लक्ष्मणं दीप्ततेजसम् ॥ १
आगताः स्म यथोद्दिष्टममुं देशं महर्षिणा ।
अयं पञ्चवटीदेशः सौम्य पुष्पितकाननः ॥ २
सर्वतश्चार्यतां दृष्टिः कानने निपुणो ह्यसि ।
आश्रमः कतरस्मिन्नो देशे भवति संमतः ॥ ३
रमते यत्र वैदेही त्वमहं चैव लक्ष्मण ।
तादृशो दृश्यतां देशः संनिकृष्टजलाशयः ॥ ४
वनरामण्यकं यत्र जलरामण्यकं तथा ।
संनिकृष्टं च यत्र स्यात्समित्पुष्पकुशोदकम् ॥ ५

ग्रसेविता, Ñ2 V B D5 7 जगाम पचावटमाश्रम ततो —d) Dg1 T3 ह्यरीन्दिधक्षु (T3 °क्षन्) Ś1 D2 3 इव स त्रिलोचन, Ñ1 D1 इव सानिलोनल Ñ2 V B D5 7 जटायुपा तेन समेत्य वीर्यवान् —After 36, Ñ2 V B D5 7 ins

259* ततोऽविदूरे वनसवसकटे
सलक्ष्मणो राघववशवर्धन ।
विवेश पञ्चावटमुग्रसेवित
रिपून्दिधक्षु शलभानिवाज्यभुक् ।

[(l 3) Ñ2 D5 7 आश्रम ततो (for उग्रसेवित) V1 विवेश पचावटिमुग्रमेविता, V2 विवेश त पचवटीयमाश्रम —(l 4) V1 B3 रिपु दिधक्षु शलभानि° ❀ Cvp रिपून् दिधक्षञ्शलभानिवानल इति पाठ ❀]

Colophon —*Sarga name* Ś1 D2 भूतोत्पत्ति, Ñ1 जटायुदर्शन, Ñ2 जटायुसमागम, V B जटायुष समागम (V1 °म), D1 रामजटायुसमागम, D3 जटायुजन्मवर्णन, D5 जटायुसमागमो नामा वश, D7 जटायु राम —*Sarga no* (figures, words or both) Ś1 Ñ1 B1 D2 om, Ñ2 V2 B3 D1 5 7 20, V1 19, B2 4 21, Dg1 Dt1 Dm1 D4 6 8 T G M1 14, D3 23, M2 3 15 —After colophon, G concludes with श्रीरामाय नम

14

D8 begins with ॐ, M1 with श्रीरामाय नम

1 a) Ś1 Ñ1 D1-3 स ता, Ñ2 V B D5 7 M2 3 स तु (for तत) —b) M1 द्विज- (for -व्याल-) Ś1 Ñ1 D1-3 नानाशकुनिनादिता, Ñ2 V B D5 7 नानाव्याल(V1 °ड, B1 3 [marg also]°पक्षि)निषेविता —cd) Dm1 D8 G3 श्रीमान्, M3 दीप्त (for रामो) Dg1 उवाच राम सौमित्रि (for c) Dg1 भ्रातर, Dm1 D1 8 T1 2 G M Cg सौमित्रिं (for लक्ष्मण) B3 Dt1 D6 T3 transp भ्रातर and लक्ष्मण Ś1 Ñ1 D1-3 शुभलक्षण, B4 °चेतस (for दीप्ततेजसम्) —After 1, B3 ins

260* पश्य लक्ष्मण स्थान च दिव्यरूप विभाति मे ।

2 a) Ś1 Ñ V2 B2 3 (before corr as in text) 4 D1-3 5 7 आगता स्मो, G1 आजगाम, G2 आगतोस्मि —b) Ś1 Ñ2 V B Dt1 D1-3 5-7 M1 इम, Ñ1 M2 इद (for अमु) Ñ1 तेन (for देश) Dm1 D4 8 T1 2 Cr m g k t य देश मुनिरब्रवीत —After 2ab, Ñ2 V B D5 7 ins, while Ś1 Ñ1 D1-3 subst for 5ab

261* रमणीय वन यत्र यत्र मूलफलं स्थिरम् ।

[D5 (m) यत्र (for first यत्र) Ñ2 V B3 D7 पत्र, G(ed) पुष्प- (for second यत्र). B3 मूल (for मूल-) V1 फल स्थित, V2 -फलद्रुम Ś1 Ñ1 D1-3 यत्र चापो (Ñ1 °आपो हि) गुणान्विता (for the post half)]

—c) Ś1 Ñ V B1 4 (marg also) D1-3 5 पञ्च(Ñ1 B1 D2 5 °चा)वटीय(D3 °टी च) सौमित्रे, B2-4 D7 पञ्चवटीय सौमित्रे —d) Ś1 Ñ V B D1-3 5 7 देश, M2 3 सौम्य (for सौम्य) Ś1 -मानस, Dm1 D1-4 8 G3 M -पादप (for -कानन)

3 B1 cm 3ab —a) D5 7 कार्यता (for चा°) Ś1 D2 दृष्टि, V2 चक्षुर् (for दृष्टि) —b) Ś1 D2 निपुणा, Ñ B2 D3 5 7 निपुणा, V B2 4 निपुण, G(ed) विपुला (for कानने) V2 पुण्यतो (for निपुणो) D1 निर्गुण निगुणो ह्यसि (sic) —c) Ñ1 च, Ñ2 B1 D1 3 5 7 तु, B2-4 च, D1 यो (for नो) V1 कतमस्त्वया (sic), V2 कृतमस्तस्मिन्, M1 कतमस्मिन्नो Ś1 D2 आश्रम कुरु य(D2 त)स्मिस्तु —d) Ś1 D5 (after corr as in text) G3 M2 देशो (for देशे) Ñ2 V B D1 3 5 7 भवतु, G(ed) च तव (for भवति) M2 शोभन (for समत)

4 a) B D2 3 रमेत (for रमते) D1 वैदेही रमते यत्र —b) M2 सह त्व (for त्वमह) Dm1 D8 G1 3 [अ]पि (for [ए]व) —After 4ab, Ñ2 V (V2 l 1 and 2) B D5 7 read 263* —c) Ś1 दृश्यते, B4 मृश्यता (for दृश्यता). —d) B2 फलाशय —After 4, V2 reads l 3 of 263*

5 ab) Dg1 वन (for वन-) T2 तत्र (for यत्र) Dg1 स्थल- (for जल-) M3 वनमारण्यक यत्र जलमारण्यक तथा —For 5ab, Ś1 Ñ1 D1-3 subst 261* —After 5ab, M2 ins

262* समे तीर्थे शिवे चैव बहुपुष्पफलोदके ।
वन रम्यस्थल रम्य जलरम्य च यद्भवेत् ।

—c) Ś1 Ñ1 D1-3 यतश्च स्याद्, Dg1 Dt1 Dm1 D4 6 8 T3 G3 M2 च यस्मिस्तु, G1 च यस्मिन्न, G2 तु यस्मिन्न, M1 च यस्मिन्स्यात्, M3 तु यास्मिस्तु (for च यत्र स्यात्). —d) Ś1 Ñ1 D1-3 इध्मपुष्पकुशार्जन(Ñ1 illeg for कुशार्जन) —For

एवमुक्तस्तु रामेण लक्ष्मणः संयताञ्जलिः ।
सीतासमक्षं काकुत्स्थमिदं वचनमब्रवीत् ॥ ६
परवानस्मि काकुत्स्थ त्वयि वर्षशतं स्थिते ।
स्वयं तु रुचिरे देशे क्रियतामिति मां वद ॥ ७
सुप्रीतस्तेन वाक्येन लक्ष्मणस्य महाद्युतिः ।
विमृशन्रोचयामास देशं सर्वगुणान्वितम् ॥ ८
स तं रुचिरमाक्रम्य देशमाश्रमकर्मणि ।
हस्ते गृहीत्वा हस्तेन रामः सौमित्रिमब्रवीत् ॥ ९
अयं देशः समः श्रीमान् पुष्पितैस्तरुभिर्वृतः ।
इहाश्रमपदं सौम्य यथावत्कर्तुमर्हसि ॥ १०
इयमादित्यसंकाशैः पद्मैः सुरभिगन्धिभिः ।
अदूरे दृश्यते रम्या पद्मिनी पद्मशोभिता ॥ ११
यथाख्यातमगस्त्येन मुनिना भावितात्मना ।
इयं गोदावरी रम्या पुष्पितैस्तरुभिर्वृता ॥ १२
हंसकारण्डवाकीर्णा चक्रवाकोपशोभिता ।
नातिदूरे न चासन्ने मृगयूथनिपीडिता ॥ १३
मयूरनादिता रम्याः प्रांशवो बहुकन्दराः ।
दृश्यन्ते गिरयः सौम्य फुल्लैस्तरुभिरावृताः ॥ १४ G 3 21 13 B 3 15 14 L 3 20 14

5, Ñ2 V B D5 7 subst and read after 4^{ab} (V2 alone reads l 3 after 4)

263* सनिकृष्ट च यत्र स्यात्समिदेध फलोदकम् ।
वन रम्य च सौमित्रे स्थलीरम्य च यद्भवेत् ।
सनिकृष्ट च यत्र स्यादिध्मपुष्पफलागम ।

[B3 reads in marg l 1 after l 3 —(l 1) D6 सनिकृष्टश्च V1 B3 (marg also as above) इध्मपुष्प, V2 इध्ममेध - (for समिदेध -) —(l 2) V D5 स्थल (for स्थली-) B3 धन्य (for रम्य) —(l 3) V B2-4 D7 सनिकृष्टश्च, D6 सनिकृष्टस्य Ñ2 V B D5 7 इध्म(B4 दिव्य)पुष्पफलागम (for the post half)]

6 ^{a}) Ñ1 स (for तु) —^{b}) Ś1 सहिता°, Ñ V B D1-3 5 7 M3 सहता°, T3 सयुता° (for सयताञ्जलि) —^{c}) B1 ससीत तत्र काकुत्स्थम्

7 D4 om (hapl) 7-9 —^{a}) Ś1 V2 B D1-3 धर्मज्ञ (for काकुत्स्थ) —^{b}) D3 वर्षायुत (for °शत) —D1 om 7^c-8 —^{c}) M3 रुचिते (for रुचिरे) —For 7^{cd}, Ś1 Ñ V B D2 3 5 7 subst

264* स्वयमेव रुचिर्देशे क्रियता यत्र रोचते ।

[Ñ2 D5 7 शुचौ (for रुचिर्) Ś1 देशो D6 यदि (for यत्र)]

8 D1 4 om 8 (cf v l 7) —^{a}) Ñ2 V1 B2 3(after corr as in text) 4 D5 7 स प्रीतस् —^{b}) G1 M2 महात्मन (for °द्युति) —^{c}) Ñ2 V B D5 7 विमृश्य (for विमृशन्) —^{d}) B2 -गुणाधिक (for °न्वितम्) —After 8, V2 B3 (m) ins

265* त च देश समाक्रम्य देशभाग विशारद ।
देवताना यथाभाग विभज्य स्थानमात्मवान् ।
तत सौमित्रिसहित सीतया च स राघव ।
गोदावरी पुरस्कृत्य निवेशमकरोत्पुन ।

9 D4 om 9 (cf v l 7) —^{a}) Ñ2 V B D5 7 स त रुचिरपानीय. —^{b}) T1 कर्मणे (for °णि) —^{c}) Dg1 T2 3 Cg हस्तौ, Dm1 M1 हस्त, Cr k t as in text (for हस्ते) Ś1 Ñ V B D1-3 5 7 प्रगृह्य हस्त हस्तेन —^{d}) Ñ2 V B लक्ष्मणम्, D5 7 वचनम् (for सौमित्रिम्)

10 ^{a}) Ñ2 V1 B D5 7 शुभ, V2 शुचि (for सम) —^{b}) B3 युत (for वृत) —^{c}) Ñ2 Dt1 D1 6 T3 रम्य (for सौम्य) —After 10, G2 reads 13

11 ^{b}) D3 पुष्पै (for पद्मै) M2 तु शुभ- (for सुरभि-) —^{c}) Ś1 अदूर Ñ2 D5 7 शोभते (for दृश्यते) V1 M2 पुण्या (for रम्या) —^{d}) Ś1 Ñ1 D1-3 पद्मिनी हससेविता, Ñ2 V B D5 7 पुण्या(V1 रम्या) गोदावरी नदी(B1 सरित्), Dm1 D8 T G1 2 M1 3 Cv m पद्मिनी पद्मसेविता

12 Ñ2 B D5 7 om 12 —^{a}) D1 यथाख्याता त्वगस्त्येन —V om 12^{cd} —^{c}) D1 पुण्या (for रम्या) —^{d}) Ś1 D1-3 नदी पक्षिग(D1 °गु)णान्विता, Ñ1 पुण्या नदिगणान्विता

13 G2 reads 13 after 10 —^{b}) Ñ2 -सहिता, V1 B2-4 (marg also as in text) D1 -कूजिता, Dm1 D8 सेविता, (for शोभिता) —Ñ1 om (hapl ?) 13^{cd} —^{c}) M1 transp न and च Ś1 D1-3 च सौमित्रे (for न चासन्ने) Ñ2 V B D5 7 न च(V1 B2 3 नि) दूरे न चाभ्यासे(D7 °शे), Cg cites नातिदूरेण चासन्ने —^{d}) B1 मृगयूथैर् (for °यूथ-) Ś1 D1 3 -[उ]पशोभिता, Ñ2 B D5 7 -विलोडिता, V1 -विलोलिता, Dg1 M1 3 -[अ]वपीडिता, D2 -[उ]पसेविता, D4 8 Cm -निपीडिता, G2 -[अ]भिपीडिता, M2 -[अ]भिलोलिते

14 D2 om 14-16^b —^{ab}) Ś1 Ñ1 D1 3 मयूरनादिता रम्या दृश्यते बहुकदरा, Ñ2 V B D5 7 M2 मयूराभिरुतो रम्य (M2 °ते रम्ये) प्राशु (B1 2 D5 M2 °शु) कदरवान्गिरि —^{c}) Ñ1 illeg for न्ते गिरय Ś1 Ñ1 D1 3 चेमे, Dt1 D6 सौम्या (for सौम्य) Ñ2 V B D5 7 M2 नानालतावि(V1 B2 °प्र)तानाढ्य —^{d}) Ñ1 illeg, T3 व्यक्तैस् (for फुल्लैस्) Ñ1 D3 बहुभिर् (for तरुभिर्) M2 आवृत Ś1 शोभिता बकुलै कुलै, Ñ2 V B D5 7 M3 पुष्पितैस्तरुभिर्वृत (M3 °ता) —After 14, Ñ2 V2 B D5 7 read 16^{ab}

G 3 21 14 B 3 15 15 L 3 20 17 सौवर्णै राजतैस्ताम्रैर्देशे देशे च धातुभिः ।
गवाक्षिता इवाभान्ति गजाः परमभक्तिभिः ॥ १५
सालैस्तालैस्तमालैश्च खर्जूरैः पनसाम्रकैः ।
नीवारैस्तिमिशैश्चैव पुंनागैश्चोपशोभिताः ॥ १६
चूतैरशोकैस्तिलकैश्चम्पकैः केतकैरपि ।
पुष्पगुल्मलतोपेतैस्तैस्तैस्तरुभिरावृताः ॥ १७
चन्दनैः स्यन्दनैर्नीपैः पनसैर्लकुचैरपि ।
धवाश्वकर्णखदिरैः शमीकिंशुकपाटलैः ॥ १८
इदं पुण्यमिदं मेध्यमिदं बहुमृगद्विजम् ।
इह वत्स्याम सौमित्रे सार्धमेतेन पक्षिणा ॥ १९
एवमुक्तस्तु रामेण लक्ष्मणः परवीरहा ।
अचिरेणाश्रमं भ्रातुश्चकार सुमहाबलः ॥ २०

15 D2 om 15 (cf v l 14) Ś1 reads 15 after 18 V1 repeats (var) 15^{ab} after 16^{ab} —^{a}) Ś1 Ñ1 V1 (first time) D1 3 राजतेरायसैस्ताम्रैर्, Ñ2 V (V1 second time) B D5 7 राजतैर्धातुभिश्चित्रैर् —^{b}) B3 reads first देशे in marg Ñ2 D5 7 विलक्षित, V1 (second time) च गवाक्षित (hypm), V2 B3 4 गवाक्षित, B1 शरैर्वृत, B2 गवान्वित, D6 तथा शुभे, G (ed) च लक्षित (for च धातुभि) Ś1 D3 आका (L [ed] °क)रश्चैव धातुभि —Ñ2 V2 B D5 7 om 15^{cd} —^{cd}) Ś1 नलाश्चला, D1 नगा फुल्ला, D3 नगाश्चला (for गवाक्षिता) G1 M2 नगा· (for गजा) Ñ1 D3 दर्पिता, Dg1 पक्तिभि, Dm1 D4 8 T1 2 M1 -पत्तिभि, G Cr -पक्तिभि, M2 वप्रिभि, M3 -वर्ष्मभि, Cvp k as in text, Cm -भित्तिभि (for -भक्तिभि) Ś1 D1 गा· परमदर्पित (for ^{d}) V1 नगश्चल इवाभाति गज परमदर्पित —After 15, Dm1 ins रामाय नम

16 Ś1 D2 om 16^{ab} (for D2, cf v l 14) Ñ2 V2 B D5 7 read 16^{ab} after 14 —^{a}) Ñ V1 B1–3 Dg1 D3 5 7 शालैस्तालैस्, B4 तालै शालैस् —^{b}) Dg1 T3 G M1 खर्जूर- (for °रै) Dt1 पनसैर्द्रुमै, D6 T3 पनसद्रुमै Ñ V B D1 3 5 7 खर्जूरश्चोप (Ñ2 V1 D5 7 °रप, B4 °रति)शोभित (Ñ1 D1 3 °ता) —After 16^{ab}, V1 repeats 15^{ab} (var) —D3 transp 16^{cd} and 18^{cd} —^{c}) V1 वानीरैस् (for नीवा°) D8 in marg, G1 तिमिभिश् (for तिमिशैश्) Ś1 वानीरैश्चत्र जनीर, Ñ1 V2 B D1–3 वानीरैश्च तिमी (Ñ1 D1 निमी)रश्च, Ñ2 D5 7 वानीरैश्च तमालैश्च, M2 नीवारैश्चापि तिमिश, G (ed) वानीरस्तिनिशैश्चैव —^{d}) G1 M1 [पु]व, M2 [अ]पि (for [उ]प) Ñ1 D2 (before corr as in text) 3 -शोभिता Ñ2 V B4 (m also) D5 7 पनसै (B4 orig °लत्र)र्वकुलैश्चैव (V1 °स्तथा, V2 illeg for श्चैव), B1–3 G (ed) पलाशै (B1 पनस)र्वञ्जुल (G [ed] °र्जुनै)श्चैव

17 ^{ab}) Ś1 Ñ1 D1–3 च तथा (for तिलकैश्) D4 स्तकैर्, G1 तिन्दुकैर् (for केतकैर्) Dg1 Dt1 T3 केतकैरपि चंपकै, D6 कनकैरपि पद्म (meta) कै (for ^{b}) Ñ2 V B D5 7 चंपकै कर्णिकारैश्च तथाशोकैर्विभूषित (B1 marg also °शोभित) —^{c}) Ś1 Ñ V B D1–3 5 7 वृक्ष (Ś1 Ñ1 D1–3 पुष्प)गुल्म (Ñ1 °द्रु)सहस्रैश्च —^{d}) Dt1 om (hapl ?) स्तैस्तै Ś1 Ñ1 D1–3 बहुभिर् (for तरुभिर्) D3 आचिता (for आवृता) Ñ2 V B D5 7 तिलकस्तिदुकैरपि (B1 °स्तथा) —After 17, Ñ2 V B D5 7 ins

266* दृश्यतामेष सौमित्रे नानामृगगणायुत ।
राजता धातवो यत्र काञ्चनाश्च महागिरौ ।
आयसाश्चैव ताम्राश्च विभ्राजन्ते समन्तत ।
अभ्यास एव शैलस्य विशाला भूमय समा ।
यासु तालास्तमालाश्च खर्जूराश्च सहस्रश । [5]
वानीराश्च तिमीराश्च पुनागाश्च नगोत्तमा ।
देशोऽयं फलपुष्पाढ्य प्रकृष्ट इति मे मति ।

[(l 1) V1 -लतान्वित, B1 गणैर्वृत, B4 -गणान्वित (for गणायुत) —(l 4) D5 अभ्याशम् (for अभ्यास) Ñ2 D5 7 विमला (for विशाला) —(l 5) B4 ज्वूताल- (for यासु तालास्) D7 om (hapl) तमाला —(l 6) B4 (m also) पनसाश्च (for पुनागाश्च) —(l 7) Ñ2 B4 (marg as above) D5 7 -मूलाढ्य (for -पुष्पाढ्य) Ñ2 प्रहृष्ट (for प्रकृष्ट)]

18 ^{a}) Cv स्पदनैर् (for स्यन्दनैर्) Dg1 Dt1 Dm1 D6 8 T3 M1 स्यदनैश्चदनैर् (by transp) Ś1 V2 B2 शालै, Ñ1 चैव, V1 तालै, L (ed) सालैस् (for नीपै) Ñ2 D5 7 चपकैश्चदनैस्तालै, D1 2 G1 चदनै स्पदनै शालैस् (G1 नीपै), D3 चदनैस्तालवृक्षैश्च, G2 3 M2 3 स्पदनैश्चदनैर्नीपै —^{b}) K (ed) Cg k पर्णासैर्, Cvp r पर्णसैर् (for पनसैर्) D4 T3 G2 3 M1 Cvp g k लिकुचैर्, T1 M3 वकुलैर्, G1 निचुकैर् (for लकुचैर्) Ś1 Ñ1 D1–3 तमालैर्वकु (D3 °हु)लैरपि, Ñ2 V B (B3 [m also]) Dg1 D5 7 M2 पियालै (Dg1 पर्णकै, D5 प्रियालै, M2 पुष्पितै)र्वकुलै (B3 orig °दरै)रपि —D3 transp 16^{cd} and 18^{cd} —^{c}) V1 धराश्च, M3 (after corr sec m as in text) ववाश्चि- (for धवाश्व-) V1 D1 (after corr as in text) कर्म-, Dg1 पर्ण, M2 कर्ण, M3 कर्णि- (for कर्ण) —^{d}) D8 पाटकै (for °लै) —After 18, Ś1 reads 15, while T2 ins

267* शमी शैलाश्च दृश्यन्ते समन्ताच्चित्रकानना ।

19 ^{a}) Ñ2 V B D5 7 मेध्यम् (for पुण्यम्) Ś1 Ñ V B Dt1 D2 3 5–7 रम्यम्, Cg as in text (for मेध्यम्) D1 इद पुण्यतम दिव्य —^{b}) Dg1 (m), D1 नाना- (for इद) B2 वन्य-, M3 पुण्य- (for बहु-) Ñ2 V B D5 7 मृग वन, G (ed) -गुण वन (for मृगद्विजम्) —^{c}) Ś1 Ñ1 Dg1 Dm1 D1–3 T3 G3 इह वत्स्यामि, Ñ2 V B1 2 4 D5 7 वत्स्या (V1 °सा)मोत्रैव, B3 वत्स्यामश्चात्र (for इह वत्स्याम) —^{d}) Ś1 Ñ V B D1–3 5 7 सहानेन (B1 °येन, D2 सह तेन) पतत्रिणा

20 ^{a}) D3 नचिरेण (for अचि°) Ś1 भर्तुश् (for

पर्णशालां सुविपुलां तत्र संघातमृत्तिकाम् ।
सुस्तम्भां मस्करैर्दीर्घैः कृतवंशां सुशोभनाम् ॥ २१
स गत्वा लक्ष्मणः श्रीमान्नदीं गोदावरीं तदा ।
स्नात्वा पद्मानि चादाय सफलः पुनरागतः ॥ २२
ततः पुष्पबलिं कृत्वा शान्तिं च स यथाविधि ।
दर्शयामास रामाय तदाश्रमपदं कृतम् ॥ २३
स तं दृष्ट्वा कृतं सौम्यमाश्रमं सह सीतया ।
राघवः पर्णशालायां हर्षमाहारयत्परम् ॥ २४
सुसंहृष्टः परिष्वज्य बाहुभ्यां लक्ष्मणं तदा ।
अतिस्निग्धं च गाढं च वचनं चेदमब्रवीत् ॥ २५
प्रीतोऽस्मि ते महत्कर्म त्वया कृतमिदं प्रभो ।
प्रदेयो यन्निमित्तं ते परिष्वङ्गो मया कृतः ॥ २६
भावज्ञेन कृतज्ञेन धर्मज्ञेन च लक्ष्मण ।
त्वया पुत्रेण धर्मात्मा न संवृत्तः पिता मम ॥ २७

G. 3 21 29
B. 3 15 29
L 3 20 27

भ्रातुश्) —d) Ś1 स महाबल , Ñ2 V B D5 7 सुमनोहर (for सुमहाबल)

21 b) G1 [अ]सघात-, Cm g सखात- (for सघात-) M2 समसस्थानमृत्तिका —c) Dg1 G2 अस्तभा (for सु°) —d) Dg1 Dm1 सुशोभिता (for °भनाम्) Cv cites this st as in text —For 21, Ś1 Ñ V B D1–3 5 7 subst , while M2 ins after 22

268* पर्णशाला स मतिमाश्चकार विपुला तदा ।
मनोज्ञा राघवस्यार्थे प्रेक्षणीया मनोरमाम् ।

[(l 1) Ś1 V1 D2 सु , Ñ V2 D1 3 5 7 च, M2 तु (for स) Ś1 D1 2 सु(D1 च)विपुला, V1 सुम° (for म मतिमाश्) V B2 4 विमला (for विपुला) Ś1 D1–3 चकार स(Ś1 °राशु, D2 °र सु) नरोत्तम (for the post half) —(l 2) Ś1 Ñ1 D1–3 उपास्या (for मनोज्ञा) Ś1 Ñ1 D1–3 अनुत्तमा, B1(m also as above) °हरा (for मनोरमाम्)]

—After 21, D4 T1 2 3(om [hapl] up to l 3 of 270*) G2 M1 ins

269* निवास राघवस्यार्थे चकार लघुविक्रम ।

—Thereafter D4 T1 2 3(om [hapl] up to l 3) M1 cont , while Dg1 Dt1 Dm1 D6 8 G1 3 M2 ins. after 21

270* शमीशाखाभिरास्तीर्य दृढपाशावपाशिताम् ।
कुशकाशशरैः पर्णैः सुपरिच्छादिता तथा ।
समीकृततला रम्या चकार सुमहाबल ।
निवास राघवस्यार्थे प्रेक्षणीयमनुत्तमम् ।

[Dg1 reads l 1 in marg —(l 1) M1 2 शम्यैरेव (M2 चर्मैरेका) समास्तीर्य (for the prior half) —G1 om l 2–3 —(l 2) M1 2 -च्छदै (for शरै) —Dg1 reads in marg from पर्णै up to तथा M1 तदा (for तथा) T1 सुपरिच्छादितातरा, M2 श्चाप शोभिता तथा (for the post half) —Dg1 om l 3 —(l 3) M1 लघुविक्रम (for सुमहाबल) M2 समीकृततलोपेन रमणीय मनोहर —For l 4, cf 269* —(l 4) Dg1 G1 3 चकार लघुविक्रम , Dm1 D8 चकारातुलविक्रम , M1 प्रेक्षणीयामनुत्तमा (sic), M2 चकार परवीरहा (for the post half)]

22 a) Ñ2 V B D5 7 गत्वा तु, T3 सहसा (for स गत्वा) —b) Ś1 Ñ V B2 4 Dg1 D1–3 5 7 G1 3 M1 3 तत , T2 G2 तथा, I3 गत (for तदा) —c) Ñ2 V B D5 7 [उ]पादाय (for चादाय) Ś1 Ñ1 D1–3 स्नात्वा सलिलमादाय(D3 °हृत्य) —d) G3 सफल, M2 जल च (for सफल) Ś1 Ñ1 D1–3 तत शीघ्रमुपागमत् , Ñ2 V B D5 7 सु(V2 B स)शीघ्र(V1 राघव) पुनराययौ —After 22, M2 ins 268*

23 a) D1–3 तत्र (for तत) Ś1 D2 दत्त्वा (for कृत्वा) —b) Dm1 तथाविधि (for यथा°) Ś1 Ñ1 D1–3 शांतिकर्म च वीर्यवान् —For 23ab, Ñ2 V B D5 7 subst

271* पुष्पोपहार कृत्वाथ हुत्वाग्नि स विधानत ।

[D5 तु (for [अ]थ) V1 हुत्वाग्नि तु, V2 B1 हुत्वा चाग्नि, B4 हुत्वाग्नि च]

—c) Ś1 Ñ1 D1 2 रामस्य, D3 धर्मस्य (for रामाय)

24 a) M3 त दृष्ट्वा स (by transp) Ñ2 V B D5 7 स तु दृष्ट्वाश्रम रम्यम्(B4 m also दिव्यम्) —b) Ñ2 V B1 3 4 D5 7 आगत्य, B2 आगम्य (for आश्रम) Ś1 Ñ1 D1 2 4 T1 2 G2 सीतया सह (by transp) —c) Ñ2 V2 B2 4(marg also as in text) D5 7 G1 पर्णशाला च (for °शालाया) —d) B2 आरोहयत् , D3 अहारभवत् (sic), D7 आरोहयत् (for आहारयत्) Ś1 Ñ1 D1–3 तदा, D4 T2 भृश (for परम्)

25 a) Ś1 Ñ V1 B3 4 D3 5 7 G2 M2 सप्रहृष्ट (D3 °ष्ट), V2 B1 2 D2 G1 3 M1 3 स प्रहृष्ट , D1 सप्रविष्ट (for सुसहृष्ट) —b) Dg1 G1 2 तथा (for तदा) —c) Ñ2 D5 7 अतिश्लक्ष्ण, B4(marg also as in text) अतिहृद्य, G2 तत स्निग्ध (for अतिस्निग्ध) Ś1 Ñ1 D3 सुमधुर, Ñ2 V B1 2 4 D5 7 मनोहारि, D1 2 समधुर (for च गाढ च) B3 अतिस्निग्ध-मनोहारि —d) Ñ2 D5 7 स्निग्धम् , V B श्लक्ष्णम् (for चेदम्) Ś1 Ñ1 D1–3 लक्ष्मण वाक्यमब्रवीत्

26 M3 om 26ab —a) Ś1 Ñ1 D1–3 सु- (for ते) —b) Dt1 M2 अरिंदम (for इद प्रभो) Ś1 Ñ1 D1–3 कृत क्षिप्रमिद(D1 °ह) त्वया, Ñ2 V B D5 7 त्वया य(D7 स)-त्कृतमीदृश —cd) Ś1 D1 प्रदेशे यन् , Ñ1 D2 प्रसादो यन्-, D3 प्रीतिदाय- (for प्रदेयो यन्-) M1 Cv यन्निमित्तस् (for °त्त) D3 स (for ते) Ñ2 V B D5 7 परिष्वगमिम(V B1 4 °ट) तावत्प्रीतिदाय(B2 °न) गृहाण मे

27 a) Ñ2 V B D5 7 गुणज्ञेन (for भाव°) —b) D7 om (hapl) धर्मज्ञेन —cd) Cmp नायेन (for पुत्रेण) Ś1

G 3 21 30 B. 3 15 30 L 3 20 28 एवं लक्ष्मणमुक्त्वा तु राघवो लक्ष्मिवर्धनः ।
तस्मिन्देशे बहुफले न्यवसत्स सुखं वशी ॥ २८

कंचित्कालं स धर्मात्मा सीतया लक्ष्मणेन च ।
अन्वास्यमानो न्यवसत्स्वर्गलोके यथामरः ॥ २९

इति श्रीरामायणे अरण्यकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

Ñ1 D1-3 नाथवान्(D1 °वत्) स (for न सवृत्त) Ñ2 V B D5 7 सत्पुत्रेण त्वया तात तारि(B1 पावि)ता पितरो मम

28 ^{a}) B4 च (for तु) Ñ2 D5 7 एवमुक्त्वा लक्ष्मण स —After 28^{a}, B4 ins

272* रामो धर्मभृता वर ।
एव राघव उक्त्वा च

[After l 1, 28^{a} and l 1 are repeated in marg —l 2 is in marg]

—B4 reads 28^{b} in marg —^{b}) B4 लक्ष्मण (for राघवो) Ñ2 B1 2 4 G2 लक्ष्मिवर्धन, V2 B3 प्रीतिवर्धन(B3 °न) (for लक्ष्मिवर्धन) —^{c}) G2 अस्मिन् (for तस्मिन्) —^{d}) Dg1 Dt1 T2 G1 M1 3 सुसुख, Dm1 D8 स सुखी, G3 च सुख (for स सुख) Dt1 D6 T1 3 G1 3 M सुखी, Dm1 D8 सुख (for वशी) Ñ2 V B D5 7 बहुपुष्पोपशोभिते —For 28, Ś1 Ñ1 D1-3 subst

273* एवमुक्त्वा तु सौमित्रिं धर्मात्मा भ्रातृवत्सल ।
बहुमूलफले देशे तस्मिन्सुखमुवास ह ।

[(l 1) Ś1 उक्तस् (for उक्त्वा) —(l 2) D2 फलोद्देशे, D3 फले वृक्षे (for फले देशे) Ñ1 D1.3 स (for ह)]

29 ^{a}) Dg1 D7 T2 M1 2 किंचित् D6 च (for स) Ś1 Ñ1 D1-3 वैदेह्या सह(Ñ1 D2 च स, D1 च [subm]) वै पत्न्या, Ñ2 V B1 D5 7 न्यव(D5 सोव)सत्सहितो वीर —^{b}) Ś1 Ñ1 स भ्रात्रा, D1-3 सुभ्रात्रा (for सीतया) —For 29^{ab}, B2 subst , while V2 ins after 29^{ab}, Ñ2 B1 D5 7 subst for 29^{cd}, B3.4 subst for 29, V1 ins. after 29

274* कचित्काल स धर्मात्मा स्वर्गं इन्द्र इवापर ।

—Thereafter V2 B2 cont , while V1 ins after 29^{ab}.

275* तत्र तापसमुख्याना चरतामाश्रमे तदा ।
बभूव महती प्रीतिर्दृष्ट्वा राम सलक्ष्मणम् ।
तस्मिन्देशे द्रुमैर्युक्ते रामलक्ष्मणसेविते ।
सम्यक्चरन्ति मुनय स्वर्गस्था इव निर्भया ।
नातिशीतो ववौ वायुर्नात्युष्ण तपते रवि ।
वसतो राघवस्यात्र दया चक्रे पुरदर ।
वैदेह्या च सुपत्न्या वै भ्रात्रा वै लक्ष्मणेन च ।

[(l 2) V1 परम- (for महती) —(l 3) V श्रमैर् (for द्रुमैर्) V1 पालिते (for सेविते). —(l 5) V1 नातिशीघ्र V1 om ववौ —(l 7) B2 मह (for च सु-)]

—^{cd}) B2 आश्वास्यमानो (for अन्वा°) D2 अन्वास्य न्यवसद्राम (for ^{c}) D2 M3 -लोक, G1 -लोको (for -लोके) Ś1 Ñ1 B2 D1-3 यथेश्वर , V1 यथा सुरा , V2 महेश्वर (for यथामर) T3 अन्वावसत्पचवट्या पूज्यमानो महर्षिभि —After 29, B3 ins

276* तत्रस्थाना च लोकानामानन्द च जय मुहु ।

Colophon D1 2 om (cont the Sarga) —*Sarga name* Ś1 Ñ2 V B D5 पचवट्याश्रमनिवास , Ñ1 आश्रमकरण, D3 पचवटीनिवास , D7 रामपचवट्याश्रमनिवास —*Sarga no* (figures, words or both) Ś1 Ñ1 B1 om , Ñ2 V2 B3 D7 21, V1 20, B2.4 D5 22, Dg1 Dt1 Dm1 D4 6 8 T G M1 15, D3 24, M2.3 16. —After colophon, G concludes with श्रीरामाय नम

१५

वसतस्तस्य तु सुखं राघवस्य महात्मनः ।
शरद्व्यपाये हेमन्त ऋतुरिष्टः प्रवर्तते ॥ १
स कदाचित्प्रभातायां शर्वर्यां रघुनन्दनः ।
प्रययावभिषेकार्थं रम्यां गोदावरीं नदीम् ॥ २
प्रह्वः कलशहस्तस्तं सीतया सह वीर्यवान् ।
पृष्ठतोऽनुव्रजन्भ्राता सौमित्रिरिदमब्रवीत् ॥ ३
अयं स कालः संप्राप्तः प्रियो यस्ते प्रियंवद ।
अलंकृत इवाभाति येन संवत्सरः शुभः ॥ ४
नीहारपरुषो लोकः पृथिवी सस्यमालिनी ।
जलान्यनुपभोग्यानि सुभगो हव्यवाहनः ॥ ५
नवाग्रयणपूजाभिरभ्यर्च्य पितृदेवताः ।
कृताग्रयणकाः काले सन्तो विगतकल्मषाः ॥ ६
प्राज्यकामा जनपदाः सम्पन्नतरगोरसाः ।
विचरन्ति महीपाला यात्रार्थं विजिगीषवः ॥ ७
सेवमाने दृढं सूर्ये दिशमन्तकसेविताम् ।
विहीनतिलकेव स्त्री नोत्तरा दिक्प्रकाशते ॥ ८
प्रकृत्या हिमकोशाढ्यो दूरसूर्यश्च साम्प्रतम् ।
यथार्थनामा सुव्यक्तं हिमवान्हिमवान्गिरिः ॥ ९ G 3 22 9 B 3 16 9 L 3 21 9

15

D1 2 continue the previous Sarga D8 begins with ॐ, M1 with श्रीरामाय नम .—Before 1, Ś1 V D1–3 ins

277* एव तस्य तदा याता शरदश्च त्रयोदश ।

[D1 जाता (for याता) D1 2 शरदोर्ध- (for शरदश्च) V यातो वत्सरोर्ध- (for याता शरदश्च)]

1 ^{a}) V1 तत्र (for तस्य) Ñ1 स-, V2 B3 च (for तु) D1 वसतोथ सुख तत्र —^{b}) Ñ2 V B D5 7 तपोवने (for महात्मन) —^{c}) D5 शारद्व्यपाये —^{d}) Ś1 दृष्टम्, D1–3 दृढम्, L(ed) दृष्टिम् (for ऋतुर्) Ñ1 [ऽ]भवत्तदा, Dt1 D6 G1 प्रवर्तत (for प्रवर्तते) Ñ2 V B2–4 D5 7 प्रा(V1 प्र)वर्तत भृश प्रिय (Ñ2 V1 °य), B1 प्रादुर्भूतो भृश प्रिय

2 ^{a}) Ś1 प्रवृत्ताया (for प्रभाताया) —^{b}) Ś1 Ñ1 D1–3 रजन्या (for शर्वर्यां) —D3 reads 2^{c}–3 in marg —^{c}) G3 अभिषेकाय (for °र्थं) Ś1 Ñ V B D1–3 5 7 M1 2 अभिषेकार्थमुत्थाय, M3 स्नानार्थं प्रययौ रम्या —^{d}) Ś1 Ñ V B D1–3 5 7 M1 2 ययौ, M3 ततो (for रम्या)

3 D3 reads 3 in marg (cf v l 2) —^{a}) Γ3 कलशहस्त Ś1 Ñ V2 B D5 7 च, V1 Dt1 D1–3 6 M2 तु, Dg1 G1 सन् (for त) —^{c}) Ś1 [ऽ]नुव्रजद्, B2 [ऽ]नुययौ, D2 तु व्रजन् (for ऽनुव्रजन्) Dg1 D5 7 G1 भ्रातु, T1 2 भ्रात्रा (for भ्राता) —^{d}) G1 सौमित्रिम् (for सौमित्रिर्) M2 रामम् (for इदम्)

4 ^{a}) Dg1 हि (for स) —^{b}) Ś1 Ñ V B D1–3 7 प्रभो, D5 प्राप्तो (for प्रियो) Ś1 Ñ1 D2 3 5 सदा प्रिय, Ñ2 V B D1 7 प्रिय सदा (for प्रियवद) —^{d}) Ś1 Ñ1 D1–3 किल, Ñ2 V B D5 7 गुणै, Dg1 शुचि (for शुभ)

5 ^{a}) V2 B3 नीहार, B1 नीरज (for नीहार-) Ś1 D2 -परमो, M2 -वृष्टिमाल् (for परुषो) Ñ2 V B D5 7 वायु (for लोक) ❀ Ck नीहार पौरुष इति नीहारेण पुरुषत्ववानित्यर्थं ❀ —^{b}) Ś1 Ñ2 V1 Dg1 Dt1 D2 6 7 सस्यशालिनी (for °मालिनी) —^{c}) B2 [अ]नुपगुप्तानि, D3 [अ]नुपभोज्यानि, D7 [अ]नुपभोगानि (for [अ]नुपभोग्यानि) —^{d}) Ñ1 B1 3 Dg1 Dt1 सुभोगो, T3 सुभोग्यो (for सुभगो) Ś1 सुभोग्यो हि तथानल

6 ^{a}) Ś1 B1 4 D2 3 नवाग्रा(D2 °ग्या)यण-, D1 तथाग्रयण- (for नवाग्रयण-) —^{b}) Dt1 D4 5 7 T G अभ्यर्च्य (sic), D1 अर्घ्यैश्च (for अभ्यर्च्य) —^{c}) Ś1 Ñ1 D1 कृताग्रा(Ñ1 D1 °ग्र)यणकालश्च, Ñ2 V B D5 7 कृताग्र(B1 4 °ग्रा)यणभोक्तार, D2 3 कृताग्र्या(D3 °ग्र)यणकालाश्च ❀ Cr काले आग्रयणकर्मानुष्ठानकाले कृताग्रयणिका कृताग्रयणकर्माण नवान्नप्रदानार्थं यदाग्रयणं तज्जा पूजा तथा ताभि पितृदेवता अभ्यर्च्य सन्त साधव विगतकल्मषा भवन्ति ❀ so also in Ck It cites नवेति —^{d}) B1 4 (marg also) सर्वे (for सन्तो)

7 ^{a}) Ś1 D3 राज्यकामा, Ñ2 B1 3 4 D1 5 7 प्राप्तकामा, M2 °माना (for प्राज्यकामा)

☞ V2 illeg from जनपदा up to 3 16 13 Ś1 जनपदान् (for जनपदा) —^{b}) Ś1 सपन्नरसगोरसान्, D2 5 सपन्नवरगोरसान्(D5 °सा), G(ed.) सपन्नयवगोरसा —^{c}) V1 B Dg1 D5 7 G1 विहरति (for विचरन्ति) —^{d}) Dg1 यात्राया, D4 Γ G M1 3 Cg यात्रास्था (for °र्थं) D5 या नद्य पुर्यश्च सप्रति (hypm), M2 तत्र तत्र जिगीषव

8 D5 om 8–9^{b} V1 om 8^{ab} —^{a}) T3 G2 सेव्यमाने (for सेव°) —For 8^{ab}, Ś1 Ñ B D1–3 7 subst

278* अगस्त्यसेवितामाशा सेवमाने दिवाकरे ।

[Ś1 D1–3 पुण्या (for आशा) B2 3 (before corr as above) 4 सेन्यमाने (for सेव°) Ś1 Ñ1 D1 3 दिश रवो (for दिवाकरे)]

—^{c}) M3 गृहीत- (for विहीन-)

9 D5 om 9^{ab} (cf v l 8) Ś1 om 9 —^{ab}) B D7 हिमकोशा(B4 D7 °षा)ढ्या, Dt1 हेमकोशाढ्यो, D1 हिम-

G 3 22 10 B 3 16 10 L 3 21 9 अत्यन्तसुखसंचारा मध्याह्ने स्पर्शतः सुखाः ।
दिवसाः सुभगादित्याश्छायासलिलदुर्भगाः ॥ १०
मृदुसूर्याः सनीहाराः पटुशीताः समारुताः ।
शून्यारण्या हिमध्वस्ता दिवसा भान्ति साम्प्रतम् ॥ ११
निवृत्ताकाशशयनाः पुष्यनीता हिमारुणाः ।
शीता वृद्धतरायामास्त्रियामा यान्ति साम्प्रतम् ॥ १२
रविसंक्रान्तसौभाग्यस्तुषारारुणमण्डलः ।
निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ॥ १३
ज्योत्स्ना तुषारमलिना पौर्णमास्यां न राजते ।
सीतेव चातपश्यामा लक्ष्यते न तु शोभते ॥ १४
प्रकृत्या शीतलस्पर्शो हिमविद्धश्च साम्प्रतम् ।
प्रवाति पश्चिमो वायुः काले द्विगुणशीतलः ॥ १५
बाष्पच्छन्नान्यरण्यानि यवगोधूमवन्ति च ।
शोभन्तेऽभ्युदिते सूर्ये नदद्भिः क्रौञ्चसारसैः ॥ १६
खर्जूरपुष्पाकृतिभिः शिरोभिः पूर्णतण्डुलैः ।
शोभन्ते किंचिदालम्बाः शालयः कनकप्रभाः ॥ १७

चापानि विस्फारयता क्ष्वेलता हसतामपि ।
असिशूलान्भ्रमयता गर्जता क्रोशतामपि ।
तेषा शब्द स सुमहान्पूरयामास तद्वनम् ।
उत्पेतुश्चैव नादेन श्वापदाश्च वयासि च ।
क्रव्यादानि च घोराणि ज्ञात्वा त राक्षसाधमम् । [10]

—Thereafter M2 cont 428* and then further cont

430* तेऽहीनवेगा सहसा राममेक जिघासव ।
नानायुधधरा सर्वे वर्धमानार्णवोपमा ।

24 D1 om 24 (cf v l 20), D6 om 24^{ab} (cf v l 23) —^{a}) Ñ1 D2 विहरश्च, Dg1 Dm1 D8 चालयश्च (for चारयश्च) Ś1 D3 रामो हि(D3 °पि) विहरन्स्वक्ष , G3 रामो विचालयश्चक्षु —B2 repeats here 24^{cd} (cf v l 22) —^{c}) Dg1 M3 स (for तद्) —^{d}) D1 उच्छ्रित, Cg उत्थितम् (for उद्यतम्) Ś1 Ñ1 D2 3 समताद्युद्धकाक्षिण, Dg1 G2 M3 त(G2 य)द्युद्धाभिमुखोद्यत(Dg1 °म), Dt1 D6 T3 G3 युद्धायाभिमुखो गत (T3 G3 °द्यत) —For 24, Ñ2 V B D5 7 M2 subst

431* ततो ददर्श काकुत्स्थो रक्ष सैन्यमुपागतम् ।
सर्वतश्चारयश्चक्षुर्युद्धाभिमुखमात्मन ।

[(l 1) M2 तद्ददर्श ततो राम (for the prior half) V1 B1 M2 खर- (for रक्ष-) —(l 2) M2 युद्धायाभिमुखात्मन (for the post half)]

25 ^{a}) D3 विकृष्य, G1 विनाम्य (for वितत्य) Ś1 Ñ1 D2 3 विनाम्य च(Ś1 विनाम्यैव, D2 विनम्य च, D3 सुधन्वानो) धनुर्वीर, Ñ2 V B D5 7 G(ed) विगृह्य(V1 विधृत्य, B1–3 विसृज्य, G[ed] निगृह्य) पाणिना चाप, M2 वितत्य तु धनुर्दिव्य —^{b}) Ś1 Ñ V B D1–3 5 7 M2 तूणादु(D1 °च्चो)द्धृत्य, Dg1 Dm1 G3 Cg तूण्योश्चो°, T1 तूण्या चो°, T2 तूण्यामुद्धृत्य (for तूण्याश्चोद्धृत्य) Ñ2 D5 7 M2 सायक (for सायकान्) —^{c}) M2 चापि (for तीव्र) —For 25^{cd}, Ñ2 V B D5 7 subst

432* बभूवावस्थितो योद्धु ज्यास्वनै पूरयन्दिश ।
हसन्निव स्थित श्रीमान्पुरस्तात्सर्वरक्षसाम् ।

[(l 1) B2 रामो (for योद्धु) V1 स्वनैरा- (for ज्यास्वनै). —(l 2) V B1 3 एव (for इव) D5 [आ]स्थित (for स्थित) V1 एव (for सर्व-)]

26 D1 om 26 —^{a}) Dg1 Dt1 Dm1 D3 6 8 च (for सो) Ś1 D2 3 क्रोधाद् , Ñ1 दीप्तया (for क्रुद्धो) Ñ2 V B D5 7 पुनश्च रोषदुष्प्रेक्ष्यो —^{b}) G2 3 [उ]ज्ज्वलन् , M2 [उ]स्थित (for ज्वलन्) D3 रामो ह्यग्निरिवोज्ज्वलन् —^{c}) Ñ2 V B D5 7 युक्त, Dg1 विद्ध (for [आ]विष्ट) D3 त दृष्ट्वा सहसोद्विग्ना —^{d}) Ś1 Ñ V B D2 3 5 7 M2 3 विव्यथुर् , Dg1 Dm1 D4 8 T G1 2 M1 Ck प्राद्रवन् , Ct as in text (for प्राव्यथन्) Ś1 Ñ1 D2 3 नैरृतर्षभा (for वनदेवता)

27 Ś1 Ñ1 D2 3 om 27^{ab} Ñ2 V B D5 7 transp 27^{ab} and 27^{cd} —^{ab}) Ñ2 V B D5–7 तस्य रुष्टस्य, D1 तथा क्रुद्धस्य, M2 क्रुद्धस्य तस्य (by transp) (for तस्य क्रुद्धस्य) Ñ2 V B D5 7 तु मुख, Dg1 D1 रूप तद् , G1 रूप च (for रूप तु) M3 रामस्य रूप तु (by transp) Ñ2 V1 B D5 7 T G1 ददृशुस् , D6 दृश्यते (for ददृशे) G(ed)

२४

अवष्टब्धधनुं रामं क्रुद्धं च रिपुघातिनम् ।
ददर्शाश्रममागम्य खरः सह पुरःसरैः ॥ १
तं दृष्ट्वा सगुणं चापमुद्यम्य खरनिःस्वनम् ।
रामस्याभिमुखं सूतं चोद्यतामित्यचोदयत् ॥ २
स खरस्याज्ञया सूतस्तुरगान्समचोदयत् ।
यत्र रामो महाबाहुरेको धुन्वन्धनुः स्थितः ॥ ३
तं तु निष्पतितं दृष्ट्वा सर्वे ते रजनीचराः ।
नर्दमाना महानादं सचिवाः पर्यवारयन् ॥ ४

G 3 31 4
B 3 25 4
L 3 30 4

तथा (for तदा) —After 27^{ab}, Ñ2 V B1 4 D5 7 ins a passage relegated to App I (No 5), while B2 3 ins it after 27 —^{c}) D1 च (for [इ]व) —^{d}) Dm1 D8 G3 M1 क्रुद्धस्येव (for उद्यतस्य) D1 कपर्दिन (for पिनाकिन) Ñ1 V B D5 7 उद्यतास्त्र पिनाकिन ❀ Cv दक्षस्येत्यादौ प्रथम एवकारो द्रष्टव्य । दक्षस्येव क्रतु हन्तुमुद्यतस्य पिनाकिन इति च पाठ ❀ —After 27, D1 reads 19 followed by l 3–4 of 424* —After 27, Ś1 Ñ1 D2 3 M2 ins a passage relagated to App I (No 6), D4 T1 G1 M3 repeat l 3–4 of 424* after 27 —Dg1 Dt1 Dm1 D1 4 6 8 T G M1 3 ins after 27, while M2 ins after App I (No 6)

433* तत्कार्मुकैराभरणैर्ध्वजैश्च
तैर्वर्मभिश्चाग्निसमानवर्णे ।
बभूव सैन्य पिशिताशनाना
सूर्योदये नीलमिवाभ्रजालम् ।

[(l 1) G3 आभरण- (for °रणैर्) Dt1 D6 रथैश्, T3 तैस्तैश् (sic) (for ध्वजैश्) —(l 2) Dt1 D6 तद् (for तैर्) Dm1 D8 G3 वाजिभिश् (for वर्मभिश्) T3 ध्वजैश्च शूरैर्विविधैश्च वर्मभि —(l 3) M3 वर्ण (for सैन्य) D1 बभौ तु सैन्य युधि नैर्ऋताना —(l 4) D1 नाकम् (for नीलम्) Dm1 [अ]भ्रराजि, D4 T1 G1 2 M3 °वृद, D8 °राति (for [अ]भ्रजालम्) T3 नील इवाभ्रराशि]

Colophon D2 om —*Sarga name* Ś1 खरसैन्यस्तभ, Ñ1 सैन्यभग, Ñ2 सैन्यनिर्याण, V B खरसैन्यदर्शन, D1 राक्षसाभ्युपगम, D3 रामाभ्युपगमन, D5 7 खरसैन्यनिर्याण —*Sarga no* (figures, words or both) Ś1 Ñ1 B1 3 om, Ñ2 D5 7 30, V1 29, V2 30, B2 31, B4 32, Dg1 Dt1 Dm1 D4 6 8 T G M1 24, D1 27, D3 34, M2 3 25 —After colophon, G concludes with श्रीरामाय नम

24

D2 cont the previous Sarga D8 begins with ॐ, T2 M1 begin with श्रीरामाय नम

1 For 1–4, D1 subst 438* —^{a}) Dt1 M2 (after corr *sec m* as in text) अवष्टभ्य Ñ1 D3 ततो (D3 तु त) दृष्ट्वा (for -धनु राम) Ś1 D2 अवित्रस्त (D2 अतस्तब्ध) तु त दृष्ट्वा, Ñ1 D3 अवष्टब्ध ततो (D3 तु त) दृष्ट्वा —^{b}) Ś1 Ñ1 D2 3 राघव, D6 क्रुद्ध त (for क्रुद्ध च) ❀ Cv अवष्टब्धधनुरिति। धनु शब्दमुकारात लिगानुशासिन साधु मन्यते।, Cm धनु शब्द उकारातोप्यस्ति।, Cg धन्यत इति धनु । धन धान्ये इत्यस्माद्धातो भृमृशीतृमस्जिभ्य उ इत्यौणादिकसूत्रेण उ प्रत्यय । धनुषा च धनु विदु, धनुरिवाजनि वक्र इति काव्यप्रयोगाच्च।, Ck उकारातोप्यस्ति धनु शब्द इत्यादावेवोक्त।, Ct उकारातोपि धनु शब्दो धनुर्वाचक ❀ —For 1^{ab}, Ñ2 V B D5 7 subst

434* अवध्य सर्वभूताना राममक्लिष्टकारिणम् ।
[B2 -सैन्याना (for -भूताना)]

—^{c}) V1 आगत्य (for °म्य) —^{d}) Ñ1 सिह- (sic) (for सह) Ś1 D2 3 G M3 -पुर सर, Ñ2 V B D7 निशाचरै, D5 -निशाचर (for पुर सरै) —After 1, Ñ2 V B4 D5 7 ins

435* स दृष्ट्वा राममेवैक राक्षस क्रोधमूर्छित ।

2 For 1–4, D1 subst 438* V om 2^{ab} —^{a}) D4 सशर (for सगुण) —^{b}) Dm1 D8 G3 -नि (Dm1 नि) स्वन (for °नम्) —For 2^{ab}, Ś1 Ñ B D2 3 5 7 G2 M subst

436* त दृष्ट्वा द्विगुण क्रुद्धश्चापमुद्यम्य सज्जयन् ।

[Ś1 D2 M1 सत्व (M1 °त्व) र, Ñ1 D3 G2 M2 3 मस्त्वन, B3 सहरन् (for सज्जयन्)]

—^{c}) Ñ2 V B D5 7 राघव- (for रामस्य) Ś1 B1 D3 सूत (for °त) —^{d}) Ś1 Ñ1 D2 3 चोदयस्वेत्युवाच ह, Ñ2 V2 B D5 7 M2 3 याहि याही (M2 3 चोदयस्वे) त्यचोदयत्, V1 याहि याहीति चाब्रवीत्, G1 चोदयामास राक्षस

3 For 1–4, D1 subst 438* T3 om (hapl) 3^{ab} —^{a}) Ñ2 V B D7 तु तस्य (for खरस्य) D5 स तु तस्या रुपा सूत (sic) —^{b}) Ś1 Ñ1 D2 3 तानचोदयत्, V2 समनोदयत् (for समचो°) —^{d}) Dg1 D4 T1 2 G1 3 M3 स्थितो धनु (by transp) Ś1 Ñ1 एकस्तु धूनते धनु, D2 एकस्तद्धुनुते धनु, D3 करस्थ धन्वते धनु, T3 धुन्वन्नेको धनु स्थित, M2 युद्धायावस्थितोभवत् —For 3^{cd}, Ñ2 V B D5 7 subst

437* ते ययु शीघ्रगास्तूर्णं यत्र दाशरथि स्थित ।

4 ^{a}) B1 3 निष्पादि (B3 °ति) त, D2 निपतित (for निष्पतित) Ś1 त तु निष्क्रातमालक्ष्य —^{b}) Dg1 Dt1 D6 T3 सर्वतो, T2 सर्वे च (for सर्वे ते) Ś1 Ñ1 D2 3 राघव रिपुघातिन —^{c}) Dt1 Dm1 D6 8 मुचमाना, D3 नर्दमान

G 3 31 5
B 3 25 5
L 3 30 5

स तेषां यातुधानानां मध्ये रथगतः खरः ।
बभूव मध्ये ताराणां लोहिताङ्ग इवोदितः ॥ ५
ततस्तं भीमधन्वानं क्रुद्धाः सर्वे निशाचराः ।
रामं नानाविधैः शस्त्रैरभ्यवर्षन्त दुर्जयम् ॥ ६
मुद्गरैरायसैः शूलैः प्रासैः खड्गैः परश्वधैः ।
राक्षसाः समरे रामं निजघ्नू रोषतत्पराः ॥ ७
ते बलाहकसंकाशा महानादा महाबलाः ।
अभ्यधावन्त काकुत्स्थं रामं युद्धे जिघांसवः ॥ ८
ते रामे शरवर्षाणि व्यसृजन्रक्षसां गणाः ।
शैलेन्द्रमिव धाराभिर्वर्षमाणा महाघनाः ॥ ९
स तैः परिवृतो घोरै राघवो रक्षसां गणैः ।
तिथिष्विव महादेवो वृतः पारिषदां गणैः ॥ १०
तानि मुक्तानि शस्त्राणि यातुधानैः स राघवः ।
प्रतिजग्राह विशिखैर्नद्योघानिव सागरः ॥ ११

(for नर्दमाना) Ñ1 V1 B1 2 D2 3 नादान् (for नाद) Ś1 नर्दमाना महानादा —T2 om (hapl) from 4[d] up to महानाद in the prior half of l 2 of 439* —[d]) D2 वजिनेय, M3 महिता (for मचिरा) —For 1-4, D1 subst

438* ततस्तद्रक्षसां सैन्यं महानादं महास्वनम् ।
दर्दर्श रामं समरे खरं चोत्तमतेजसम् ।
(3 27 11) { तं रथस्थं धनुष्पाणिं पौरुषे पर्यवस्थितम् ।
दृदृशुः सर्वभूतानि पाशहस्तमिवान्तकम् ।

5 T2 om 5 (cf v l 4) —[b]) D2 मध्य (for मध्ये) —Dg1 reads 5[d] in marg —[d]) Ś1 Ñ V B D1-3 5 7 ग्रह, Dg1 T3 [उ]द्यत, Dt1 [उ]द्गत, Dm1 D4 8 G3 M2 3 [उ]त्थित, D6 [उ]द्गत (for [उ]दित) —After 5, Dg1 Dt1 Dm1 D4 6 8 T1 3 G M ins

439* ततः शरसहस्रेण राममप्रतिमौजसम् ।
अर्दयित्वा महानादं ननाद समरे खरः ।

[(l 1) G3 रामं प्रति महौजस (for the post half) —(l 2) D4 6 G2 3 M अभ्य(D6 आ°, M3 अर्च)ित्वा]

6 [a]) Ñ2 V B D5 7 भीमकर्माणं, G1 अभिधुन्वान (for भीमधन्वानं) Ś1 Ñ1 D1-3 ततस्ते क्रूर(D1 भीम)कर्माण —[b]) Ñ2 V1 B2-4 D5 7 क्रुद्ध, D1 क्रूरा (for क्रुद्धा) —[c]) Ñ2 V B D5 7 शस्त्रै(Ñ2 D5 7 शर)र्नानाविधाकारैर —[d]) Ś1 Ñ2 V B D1 5 7 अभ्यवर्षन् (for °र्षन्त) Ś1 सुदुर्जयं, Ñ2 V B D5 7 सुदुर्जया, D1 महाबल (for दुर्जयम्)

7 [a]) D4 T1 पट्टिसैः, T3 आयुधेश्च (for आयसैः) D1 तपरैरायसैः प्रासैः (corrupt) —[b]) Ñ2 V B D5 7 प्रासखड्ग-(Ñ2 °ङ्गै), D1 खड्ग शूल, G1 खड्गैः प्रास (by transp) (for प्रासैः खड्ग) —[c]) Dt1 D6 शूर, M3 राजन (for रामं) —[d]) D1 निष्प्रघु (for निजघ्नु) Ñ1 क्रोध- (for रोष-) Ś1 D2 तीव्रविक्रमं, Ñ2 V B D5 7 M2 3 क्रोधमूर्छिता, D3 तीक्ष्णविक्रमा (for रोषतत्परा)

8 [a]) D1 वारिधार- (for बलाहक-) —[b]) B3 Dg1 Dt1 Dm1 D6 8 T1-3 G3 महाकाया (for °नादा) Ñ2 V B D1 5 7 T1 G1 2 M महाजव, D1 महारथा (for महाबला) —[c]) Ś1 Ñ1 D1-3 अभ्यवर्षन्त (for °धावन्त) —After 8[c], Dg1 Dt1 Dm1 D4 6 8 S ins

440* रथैर्वाजिभिरेव च ।
गजैः पर्वतकूटाभैः

[(l 1) M3 आहवे (for एव च)]

—[d]) Ś1 Ñ V B D1-3 5 7 M2 3 यातुधाना, M1 रामं युधि (for रामं युद्धे). D1 वर्धेषिणः, M2 युयुत्सव (for जिघांसव)

9 [a]) Ś1 D2 रामं, D1 दृष्ट (for रामे) G2 दृश (sic), G3 M2 शस्त्र- (for शर-) —[b]) Ś1 ससृज्य, Ñ1 ववृष्ट (sic), D2 3 5 7 ससृजु(D5 7 °जु) (for व्यसृजन्) Ñ2 V2 B2-4 मसृजु सुमहाबला, V1 B1 D1 विसृजतो(D1 °सा [sic]) महाबला —[cd]) B1 देवेन्द्रम्, B4 शैलेन्द्र (for शैलेन्द्रम्) D4 T1 बलाहका (for महाघना) Ñ2 V B D5 7 प्रवर्षत पयोधरा (for [d]) D1 राममेवाभ्यवर्तन्त सूर्यमभ्रघना इव

10 T3 om 10 V1 repeats 10[ab] after 441*. —[a]) Dt1 Dm1 D4 6 8 G2 3 M1 सर्वैः (for स तैः) Dt1 Dm1 D6 8 T2 G2 3 M1 रामो (for घोरैः) D1 रामं स तैः परिवृत —[b]) Ś1 Ñ1 V1 (second time) D2 3 काकुत्स्थो, Ñ2 V1 (first time) 2 B1 3 4 D5 7 राक्षसैर् (for राघवो) Ñ2 V1 (first time) 2 B1 3 4 D5 7 नृवरात्मज (for रक्षसां गणे) B2 भिन्नगात्रो न विव्यथे, Dt1 Dm1 D6 8 राक्षसैः क्रूरदर्शनैः, T2 G2 3 M1 राक्षसैर्घोरदर्शनैः ❀ Cg स तैरित्याद्यर्धमेकान्वयम् ❀ —After 10[ab], V1 ins

441* आकाश इव घर्मान्ते बभौ नीलाभ्रसंवृत ।

—Dg1 D4 T1 om (hapl) 10[cd] —[cd]) Ś1 D2 ऋषिभिश्च, Dm1 D8 G3 घोररूपैर्, D3 तिथ्यस्विव, T2 गवेन्द्रिव (for तिथिष्विव) Ś1 M2 3 परिषदा (for पारि°) Ñ1 D3 G3 संवृत पा(Ñ1 प)र्षदां गणैः (for [d]) D1 महापारिषदैर्घोरैर्महादेव इवेश्वर ❀ Ct पारिषदा दृढभाव आर्षः ❀ —For 10[cd], Ñ2 V B D5 7 subst.

442* महादेव पितृवने गणैः पार्श्वगतैरिव ।

11 [a]) Ñ2 V B D5 7 तेषां (for तानि) Ś1 D2 युक्तानि (for मु°) M3 शस्त्राणि मुक्तानि (by transp) (for मुक्तानि शस्त्राणि) —[b]) Ñ2 V B D5 7 राक्षसानां (for यातुधानैः) D1 सनतत, M2 3 सहसा (for स राघव) Ś1 Ñ1 D2 3 ममतास्तैर्निशाचरैः —[c]) Ś1 Ñ1 D2 3 M2 काकुत्स्थो, D1 धर्मात्मा, M1 तोयौघ (for विशिखैर्) Ñ2 V B D5 7 स्रोतांसि प्रतिजग्राह —[d]) Ñ2 V B D5 7 M1 नदीनामिव (for नद्योघानिव) Ś1 Ñ1 D2 3 नदीवेगानिवोदधि.

स तैः प्रहरणैर्घोरैर्भिन्नगात्रो न विव्यथे ।
रामः प्रदीप्तैर्बहुभिर्वज्रैरिव महाचलः ॥ १२
स विद्धः क्षतजादिग्धः सर्वगात्रेषु राघवः ।
बभूव रामः संध्याभ्रैर्दिवाकर इवावृतः ॥ १३
निपेदुर्देवगन्धर्वाः सिद्धाश्च परमर्षयः ।
एकं सहस्रैर्बहुभिस्तदा दृष्ट्वा समावृतम् ॥ १४
ततो रामः सुसंक्रुद्धो मण्डलीकृतकार्मुकः ।
ससर्ज निशितान्बाणाञ्शतशोऽथ सहस्रशः ॥ १५
दुरावारान्दुर्विषहान्कालपाशोपमान्रणे ।
मुमोच लीलया रामः कङ्कपत्रानजिह्मगान् ॥ १६
ते शराः शत्रुसैन्येषु मुक्ता रामेण लीलया ।
आददू रक्षसां प्राणान्पाशाः कालकृता इव ॥ १७
भित्त्वा राक्षसदेहांस्तांस्ते शरा रुधिराप्लुताः ।
अन्तरिक्षगता रेजुर्दीप्ताग्निसमतेजसः ॥ १८
असंख्येयास्तु रामस्य सायकाश्चापमण्डलात् ।
विनिष्पेतुरतीवोग्रा रक्षःप्राणापहारिणः ॥ १९ G 3 31 19 B 3 25 21 L 3 30 19

12 ^{a}) B2 परिवृतो घोरैर्, D1 घोरैं प्रहरणैर् (by transp) (for प्रहरणैर्घोरैर्) —^{b}) Ś1 भिन्नगात्रैर् —^{c}) Ñ1 स ते (for राम) V1 प्रवृत्तैर् (for प्रदीप्तैर्) M3 सप्रदीप्तैर्बहुविधैर् —^{d}) Ś1 Ñ1 D2 3 महीधर, Ñ2 V1 B4 Dm1 D1 7 महाबल, V2 यथाचल (for महाचल)

13 ^{ab}) D2 क्षतजाविष्ट, M1 क्षतजैर्दिग्ध (for °जादिग्ध) D1 तप्तहेमपरिच्छद (for ^{b}) Ñ2 V B D5 7 स दिग्ध सर्वतो राम शोणितेन व्यराजत —^{cd}) M1 [उ]दित (for [आ]वृत) D1 प्रबभौ राघव श्रीमानशोक इव पुष्पित —For 13^{cd}, Ś1 Ñ V B D2 3 5 7 subst.

443* दिवाकर इवाकाशे संध्याभ्रैर्बहुभिर्वृत ।

—After 13, M2 ins

444* राम सुतीक्ष्णैर्बहुभिर्नानाप्रहरणै शितै ।
निशाचरैरर्दितोऽपि न चकम्पे न विव्यथे ।
स शोणितपरीताङ्गो गिरिर्गैरिकधातुमान् ।

14 ^{ab}) Dg1 निपेतुर् (for नि°) Ś1 Ñ V B2–4 D2 3 5 7 सह चारणै, B1 स . . . (for परमर्षय) D1 विपेदु सर्वभूतानि दृष्ट्वा राम महौजस —^{c}) V1 B1 एव (for एक) D1 सपत्नैर् (for सहस्रैर्). —^{d}) V2 मुदा, B1 M2 3 तथा (for तदा) Ś1 Ñ1 D2 3 दृष्ट्वा राम, D1 क्रुद्धै क्रूरै (for तदा दृष्ट्वा)

15 ^{ab}) D6 G2 M1 तु (for सु-) Ś1 Ñ2 V B D2 3 5 7 M2 3 ततो (Ś1 D2 3 अथ) रामो महातेजा (for ^{a}) Ñ1 अथ रामो महातेजा शतशोथ सहस्रश, D1 तत शक्रायुधाकार तद्विकृष्य महद्धनु —^{c}) Ñ2 V B D5 7 मुमोच (for ससर्ज) Ś1 D2 G1 2 विविधान्, Dg1 D4 G3 M1 3 त्रिशिखान् (for निशितान्) M3 घोरान् (for बाणान्) D1 निसृजद्विशिखाग्राम —^{d}) Ñ1 तेषु रक्ष स्वशोपत, Ñ2 V B D5 7 वज्राणीव शतक्रतु

16 ^{a}) Ś1 Ñ2 V B D1–3 5–8 M2 दुराधर्षान् (Ñ2 D5 °वर्षान्, B2 D2 °धरान्, D6 °हारान्, D8 °चारान्, M2 °वरान्), T2 दूरगातान् (for दुरावारान्) M3 दुष्प्रसहान् (for दुर्विषहान्) —^{b}) Dg1 Lm1 D4 8 T G1 3 M1 Cg कालदण्डोप (T1 °डस) मान् (for कालपाशो°) —^{c}) Dt1 D6 कक (for राम) Ś1 Ñ1 D2 3 द्विप्र (Ñ1 पर,) मायस्त्र (D3 °स्त्रान्), Ñ2 V B D5 7 बहुधा राम, D1 रामो नाराचान् (for लीलया राम) —^{d}) M1 पत्रानि (after corr sic m as in text) Ś1 Ñ V B D1–3 5 7 M2 3 शरा (D1 शिता)-न्कनक (Ś1 Ñ1 D1–3 M3 काचन) भूषणान् (B2 3 °पितान्), Dt1 D6 पत्रान्काचनभूषणान्

17 ^{a}) Ś1 खर- (for शत्रु-) D1 सैन्याना (for °न्येषु) —^{b}) D1 सयुगे (for लीलया) Ñ2 V B1 D5 7 वि (B1 नि)-सृष्टा कंकपत्रिण —^{c}) Ś1 Ñ1 D2 3 आददु (Ś1 °धु) समरे प्राणान् (Ś1 सद्य), D1 आहर्तुं निशितान्प्राणान् —D4 om 17^{d}–19^{b} —^{d}) G2 काले (for काल-) Ś1 Ñ1 D2 3 कालपाश इवोद्यता, Ñ2 V B D5 7 शापा इव तपस्विना, D1 गरुड फणिनामिव —After 17, D1 ins

445* शरा विमुक्ता रामेण विधूमा हेमभूषणा ।
विविशुर्ज्वलिता घोरा महोल्का इव खे तदा ।

18 D1 om 18–19, D4 om 18 (cf v l 17) —^{a}) Ś1 Ñ V B D2 3 7 ते (for तास्) —^{b}) Ś1 Ñ V B D2 3 7 शरा रुधिर (V1 कनक) भू (B1 2 4 D3 रू) षिता —^{c}) V1 B D7 अंतरीक्ष- (for °रिक्ष-) —^{d}) Ñ2 B3 D5 7 8 दावा (D8 काला) ग्नि- (for दीप्ताग्नि-) M2 दीप्ता इव हुताशना —After 18, Ñ2 V B D5 7 ins

446* तत शरसहस्राणि मुमोच रघुनन्दन ।
सूदयन्नग्निसकाशान्समन्ताद्रजनीचरान् ।

[(l 2) Ñ2 D5 7 गिरि-, V B4 अद्रि (for अग्नि)]

19 D1 om 19, D4 om 19^{ab} (cf v l 18 and 17 respy) —^{a}) D5 असख्येण (sic) (for °यास्) Ś1 D2 T1 च, B D5 7 हि (for तु) —^{c}) Ś1 Ñ B D2 3 7 महावेगा (for अतीवोग्रा) —^{d}) Ś1 Ñ1 रक्षसा प्राणहारिण, Ñ2 B1–3 राक्षसाना प्रहारिण —V D5 subst l 1 for 19^{cd} and then cont, while Ñ2 B D7 ins after 19

447* विनिष्पेतुरसंबद्धा केचित्तत्र शिलीमुखा ।
निर्भिद्य राक्षसान्भीमानविशन्त रसातलम् ।
क्वचिद्बाणनिकृत्तानि शिरांसि द्विषता रणे ।
स्फुरन्त्याकुञ्चितोष्ठानि गा गतानि सहस्रश ।
रामचापविनिर्मुक्ते सायकै रुधिराशनै । [5]
निकृत्ता राक्षसा पेतुर्बहवोऽथ सहस्रश ।

G 3 31 23 B 3 25 21 L 3 30 20

तैर्धनूंषि ध्वजाग्राणि वर्माणि च शिरांसि च ।
बाहून्सहस्ताभरणानूरून्करिकरोपमान् ।
चिच्छेद रामः समरे शतशोऽथ सहस्रशः ॥ २०

ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः ।
भीममार्तस्वरं चक्रुर्भिद्यमाना निशाचराः ॥ २१
तत्सैन्यं निशितैर्बाणैरर्दितं मर्मभेदिभिः ।
रामेण न सुखं लेभे शुष्कं वनमिवाग्निना ॥ २२

राक्षसा भिन्नमर्माङ्गा राघवेण महात्मना ।
मुमुचु सहिता प्राणान्गच्छन्तस्ते परा गतिम् ।

[D7 om l 1 —(l 1) Ñ2 V D5 असवद्धा, B4 °नद्धा (for °वृद्धा) —(l 2) Ñ2 D5 7 सवान् (for भीमान्) Ñ2 D5 7 प्राविशत, B2 3 प्रविशतो (for अविशन्त) —(l 3) B3 केचिद् (for क°) B2 केषाचिद्बाणकृत्तानि (for the prior half) —(l 5) V B2 विमुक्तेसु (V2 °श्च) (for -विनिर्मुक्ते) —(l 6) V B रक्षमा (for राक्षमा) Ñ2 D5 7 शतशो (for बहवो) —(l 7) Ñ2 D5 7 -सर्वांगा, B1 2 मर्माणि, B3 -मर्मज्ञा (for मर्माङ्गा)]

—After 19, D4 T1 ins, G1 ins after 20^{ab}, M2 3 ins after l 3 of 452*, while D1 subst for 20^{cd} and reads after 20^{ef}

448* ते रणे साङ्गदान्बाहून्सहस्ताभरणान्भुजान् ।

[G1 सुहस्त (for स°) D1 तथा, M2 शुभान् (for भुजान्)]

—Thereafter, G1 reads l 3 of 453*, while D1 cont

449* छित्त्वा छित्त्वा विनिष्पेतु शरा रामस्य रक्षसाम् ।

20 ^{a}) D1 बाणैर्धनुर्, D4 T1 धनूंषि च (for तैर्धनूंषि) Ñ2 V B D5 7 तेषां ध्वजाग्राणि सम ❀ Cg तैरित्याद्यर्धमेक वाक्य ❀ —^{b}) Ñ2 V B D5 7 धनूंषि (for वर्माणि) Ñ2 D5 7 रुचिराणि, V B कवचानि, D4 च शिलानि (sic) (for च शिरांसि) Ś1 Ñ1 Dt1 D2 3 6 8 M2 Ck t चर्माणि कवचानि च, Dm1 वर्माणि कवचानि च —After 20^{ab}, D4 T1 G3 ins l 3 of 452*, G1 ins 448* —Ś1 Ñ1 D2 3 om 20^{cd} —^{c}) D4 बहून् (for बा°) —For 20^{cd}, Ñ2 V B D5 7 subst

450* बाहूंश्चैव महाबाहुश्चिच्छेद बहुधा शरैः ।

[Ñ2 D5 7 बहुभि (for बहुधा)],

while D1 subst 448* for 20^{cd} and reads it after 20^{ef} —Ñ2 V B D5 7 om 20^{ef} —^{e}) Ś1 Ñ1 D2 राम सहसा, M2 समरे राम (by transp) (for राम समरे) M2 reads 20^{ef} twice —After 20, Ś1 Ñ1 D2 3 ins

451* राक्षसाना तथा बाहून्सहस्ताभरणान्बहून् ।
उद्यतान्सायुधान्युद्धे चिच्छिदू रामसायका ।,

[(l 2) Ñ1 रामश्चिच्छेद सायकै (for the post half)] while Dg1 Dt1 Dm1 D4 6 8 T G M1 2 ins after 20, M3 ins after 20^{ab}

452* हयान्काञ्चनसनाहान्रथयुक्तान्ससारथीन् ।
गजांश्च सगजारोहान्सहयान्सादिनस्तदा ।

चिच्छिदुर्बिभिदुश्चैव रामबाणा गुणच्युता ।
पदातीन्समरे हत्वा अनयद्यमसादनम् ।

[(l 1) D4 -सपत्रान् (for -सनाहान्) —(l 2) Dt1 सहायान् (for सहयान्) Dg1 S तथा (for तदा) Dt1 (also) समरे शतशो हयान् (for the post half) —M1 om l 3., D4 T1 G3 read l 3 after 20^{ab} —M3 transp l 3 and 4 —(l 3) D4 T1 G3 [अ]पि (for [ए]व) D4 T1 M3 चाप- (for -बाणा) —After l 3, M2 3 ins 448* —(l 4) Note hiatus between the two halves Dm1 D4 S ह्यनयद् (to avoid hiatus)]

21 ^{a}) M2 तथा (for ततो) —^{b}) G3 तीक्ष्णैश्चैव (for तीक्ष्णाग्रैश्च) V1 तीक्ष्णाग्रैस्त्वविकर्णिकै —^{c}) D1 रामेण (for भीमम्) D2 -स्वन (for -स्वर) —^{d}) Ñ2 V B Dt1 Dm1 D1 5–7 छिद्यमाना (for भिद्यमाना) —After 21, Ñ2 V B D5 7 ins

453* केचिद्बाणप्रवेगैस्तु निर्भिन्नकवचा रणे ।
उच्चैर्गगनमाविश्य ततोऽगच्छन्रसातलम् ।
महाद्रिशिखराकारानञ्जनाचलसंनिभान् ।
खेचरान्पातयामास राक्षसान्धरणीतले ।
रामचापविनिर्मुक्ता सायका राक्षसेश्वरान् । [5]
भित्त्वा भित्त्वाथ वेगेन प्राविशन्धरणीतलम् ।

[(l 1) Ñ2 B1 D7 विभिन्न, D5 विच्छिन्न (for निर्भिन्न) —(l 2) V उच्चैर्गमनमाश्रित्य, B1 अन्ये दानवमाविश्य (for the prior half) —G1 reads l 3 after 448* —(l 3) B4 शूराञ्चल- (for अञ्जना°) —(l 4) B1 खचरान् (for खे°) Ñ2 D7 पातयामासु (for °मास) —(l 6) B2 3 च (for [अ]थ) V1 धरणीतले]

☞ B2 is a fragmentary MS breaking off from st 22

22 ^{a}) D3 सर्वं (for सैन्यं) Dt1 D6 T1 विविधैर् (for निशितैर्) —^{b}) G2 मर्दित (for अ°) D1 वज्र (for मर्म-) Ś1 -वेदिभि, D1 -नि स्वनै (for -भेदिभि) —^{c}) Dt1 Dm1 D6 8 न रामेण (by transp) —^{d}) Ñ2 V1 B1 3 4 D5 7 M2 दह्यमानम्, D2 भुक्त वनम्, D3 दग्ध वनम्, D4 शुष्क°, G2 M1 महावनम् (for शुष्क वनम्) —After 22, Ñ2 V B1 3 4 D1 5 7 ins

454* ततो निहतभूयिष्ठ शूरराक्षससूदितम् ।
तद्बल राक्षसेन्द्रस्य राघवेण शितै शरै ।
राक्षसा बलसम्पन्ना बहुधा बहवो रणे ।
महानिद्रावश नीता लीलया राघवेण तु ।

केचिद्भीमबलाः शूराः शूलान्खड्गान्परश्वधान् ।
चिक्षिपुः परमक्रुद्धा रामाय रजनीचराः ॥ २३
तानि बाणैर्महाबाहुः शस्त्राण्यावार्य राघवः ।
जहार समरे प्राणांश्चिच्छेद च शिरोधरान् ॥ २४
अवशिष्टाश्च ये तत्र विषण्णाश्च निशाचराः ।
खरमेवाभ्यधावन्त शरणार्थं शरार्दिताः ॥ २५

G 3 31 31
B 3 25 30
L 3 30 29

[(l 1) B1 निहित, B3 4 [ऽ]भिहत- (for निहत-) —(l 3) V1 बहवो बहुधा (by transp) —(l 4) V1 ते (for तु)]

23 D1 om 23 Ñ2 V B1 3 4 D5 7 read 23 after 27 —a) Ś1 Ñ1 D2 3 ते शूलशक्ति(Ñ1 शक्तिशूल [by transp])परिघान, Ñ2 V B1 3 4 D5 7 M2 3 ते गृहीत्वा शिताञ्शूलान —b) Ś1 B1 Dt1 D2 3 6 T3 G1 M2 3 प्रासान, Ñ1 V B3 D5 7 प्राश-(V1 कुन-) (for शूलान्) Ñ V B1 2 D2 5 7 खड्ग, Dg1 Dm1 D8 T3 G2 3 M1 चक्र, Dt1 D6 शूलान (for खड्गान) —For 23cd, Dg1 Dm1 D8 T G M1 subst

455* रामस्याभिमुख गत्वा चिक्षिपु परमायुधान ।
[Dm1 D8 G3 M1 स्थित्वा (for गत्वा)]

—After 23, D3 M2(l 1–2 only) ins, while Ś1 Ñ1 D2 subst for 24–25

456* तच्छस्त्रवर्षं सुमहद्विमुक्त रजनीचरैः ।
असम्भ्रान्तो रणे राम प्रतिजग्राह वीर्यवान् ।
प्रतिगृह्य च तद्वर्षं निमीलित इवाभवत् ।
तेषा बाणै सुनिशितैराददे रघुनन्दन ।
शिरासि बाहून्सार्मीश्च विमलाश्च परश्वधान् । [5]
हस्तान्सहस्ताभरणान्धनूषि कवचानि च ।
समग्रदेहैर्निहतैर्निशाचरैः
शिरोभिरुद्भासिकिरीटकुण्डलैः ।
भुजैर्भुजङ्गप्रतिमैश्च साङ्गदैः
र्विचित्रघोरास्तरणेव भूर्बभौ । [10]
ततस्तु रामस्य शरास्तजीविता
निशाचरा सप्रतिपेतुरर्दिता ।
विसृज्य शस्त्राण्यपरे विदुद्रुवु
समीक्ष्य रामस्य पराक्रम रणे ।

[(l 2) Ñ1 वने (for रणे) Ñ1 परिजग्राह (for प्रति°) —(l 3) D2 3 तु (for च) D2 सर्वं (for वर्षं) —Ñ1 om l 7–10 —(l 10) Ś1 D2 विचित्रिता तत्र रणे बभूव भू (Ś1 बभूवतु) —(l 11) Ñ1 शरातु जीविनो, D2 शरात्रपीडिता, D3 शरात्तजीविता (for शरास्तजीविता) —(l 12) D3 निशाचरा सप्रति ते भृशार्दिता —(l 13) D2 विसृष्टशस्त्रास्तु (for विसृज्य शस्त्राणि) —(l 14) D3 महत् (for रणे)]

—Thereafter Ś1 Ñ1 D2 3 read a colophon [—*Sarga name* Ś1 Ñ1 D2 3 खरसैन्यभग —*Sarga no* Ś1 Ñ1 D2 om, D3 35]

24 For subst in Ś1 Ñ1 D2, cf v l 456* D3 om 24 —a) Dt1 D1 6 G1 M2 3 तेषा (for तानि) G1 युधि (for बाणैर्) M1 महावेगैश् (for महाबाहु) —b) D1 बाणान (for शस्त्राणि) Dt1 [आ]वा॰ (for [आ]वार्य) Dt1 D6 वीर्यवान् (for राघव) —For 24ab, Ñ2 V B1 3 4 D5 7 subst

457* तेषा नानायुधान्याशु बाणैश्छित्वा तु खण्डश ।
[V1 B4 तानि (for नाना) V1 [अ]थ (for तु)]

—c) M2 रामश् (for प्राणाश्) —d) Ñ2 V B1 4 D5 7 रक्षसा राघव शरै (B4 °नै), B3 राघवो रक्षसा शरै —After 24, Ñ2 V B1 3 4 D5 7 ins

458* क्रीडन्निव महाबाहुश्चरन्राक्षसमण्डले ।
चकर्त तरसा वीरो बाहूश्चैव शिरासि च ।
ततो हलहलाशब्द पुन कलकलो महान् ।
महाराक्षसनादस्तु पुनस्तूर्यरवो महान् ।
आयुधाना च निर्घोषो रथाना च महास्वन । [5]
सिहनादश्च दृप्ताना पूरयन्वै नभस्तलम् ।
वर्धते दिक्षु सर्वासु प्रविष्टश्च रसातलम् ।
ततस्तद्राक्षस सैन्य खरदूषणसश्रयम् ।
अभ्यधावत्पुनस्तत्र राघव रघुनन्दनम् ।

[(l 3) B1 च कल्हो (for कलकलो) —B3 om (hapl) l 4 —B4 transp l 4 and 5 —(l 5) B1 3 4 निष्पेषो (for निर्घोषो) —(l 6) Ñ2 D5 7 हृष्टाना, B4 शूराणा (for दृप्ताना) B2 3 च (for वै)]

—Then B3 4 read 28ab, while Dg1 Dt1 Dm1 D1 3 4 6 8 S ins after 24

459* ते छिन्नशिरस पेतुश्छिन्नवर्मशरासना ।
सुपर्णवातविक्षिप्ता जगत्या पादपा यथा ।

[(l 1) Dt1 M3 तत्, D4 T2 3 तैश् (for ते) M2 -शिरसा (sic) (for °स) D4 -पक्ष T1 -चर्म- (for -वर्म-) G3 -शिरोधरा (for शरासना) —(l 2) Dm1 D8 G3 -पक्ष, D1 -वायु (for -वात) D1 -निक्षिप्ता (for वि°) T3 धरण्या (for जगत्या) Dt1 D4 -[आ]युधा, D1 3 M2 इव (for यथा)]

25 a) Ñ2 B1 3 4 D1 7 तु (for च) M2 ते (for ये) Ñ2 V B1 3 4 D5 7 के(D5 कि)चिद् (for तत्र) —b) Ñ2 V B1 3 4 Dm1 D1 3 5–7 M2 3 ते (for च) —c) V1 B1 3 4 [अ]भ्यपद्यत, Dm1 D8 [अ]भ्यधावत, D1 M1 2 [अ]भ्यवर्तत (for °धावन्त) —G2 om (hapl) 25d–27c —d) Dt1 D1 6 शराहता, D4 च शरार्दिता (hypm) (for °र्दिता) Ñ2 V B1 3 4 D1 7 शरार्ता शरणैषिण —For 24–25, Ś1 Ñ1 D2 subst 456* —After 25, Ñ2 V B1 3 4 D5 7 ins

460* तत्तदा राक्षस सैन्य खरदूषणसश्रितम् ।
बभूव पिण्डित तत्र यथा यूथ द्विपायिनाम् ।
स तु दृष्ट्वा खर सैन्य रामसायकपीडितम् ।

G 3 31 35 / B 3 25 31 / L 3 31 1

तान्सर्वान्पुनरादाय समाश्वास्य च दूषणः ।
अभ्यधावत काकुत्स्थं क्रुद्धो रुद्रमिवान्तकः ॥ २६
निवृत्तास्तु पुनः सर्वे दूषणाश्रयनिर्भयाः ।
राममेवाभ्यधावन्त सालतालशिलायुधाः ॥ २७
तद्बभूवाद्भुतं युद्धं तुमुलं रोमहर्षणम् ।
रामस्यास्य महाघोरं पुनस्तेषां च रक्षसाम् ॥ २८

इति श्रीरामायणे अरण्यकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

उवाच शौर्यसम्पन्न दूषण भीमविक्रमम् ।
आश्वास्यता बल वीर उद्योग क्रियता च वै ।
अह दाशरथि राम नयामि यमसादनम् ।

[(l 1) B3 तथा (for तदा) B3 मिश्रित (for सश्रितम्) —(l 2) V1 B1 3 विषाणिना (for द्विपायिनाम्) —(l 4) B1 मीरु (sic) (for भीम) —(l 5) Note hiatus between the two halves —(l 6) V1 अय, B1 3 इम (for अह)]

26 G2 om 26 (cf. v l 25) —a) Dt1 Dm1 D4 6 8 I1 2 G3 धनुरादाय, D1 समुपादाय, M2 पुनराभाप्य (for पुनरादाय) V2 एतान्सर्वान्समादाय —b) Ñ2 V B1 3 4 D5 7 दूषणो दुरतिक्रम (V B1 3 °मान्) —After 26^{ab}, Ñ2 V B1 3 4 D5 7 ins

461* बहुविस्तरसयुक्तमाश्वासयत राक्षसान् ।
तेजयित्वा च तत्सैन्य समाश्वास्य च दूषण ।

[(l 1) B4 विस्तारसयुक्तान् (for विस्तरसयुतम्) —(l 2) D7 योजयित्या (for तेज°) V2 B1 4 तु (for च) Ñ2 B3 दृषण]

—c) D1 अभ्यवर्तत (for अभ्यधावत) Dt1 D6 अभ्यधावत्सु- (D6 °स)सक्रुद्द —d) Ñ1 M1 क्रुद्ध (for क्रुद्धो). Ś1 D2 3 T2 क्रुद्ध (T2 रुद्रं) क्रुद्धमिवातक, Ñ2 V B1 3 4 D5 7 नमुचिर्वासव यथा, Dg1 T3 M3 क्रूरकर्मा निशाचर, D1 राम क्रुद्ध इवातक, G1 क्रुद्ध क्रूर इवातक ❀ Ct क्रुद्ध राम क्रुद्धोऽन्तक इवाभ्यधावत् ❀

27 G2 om up to 27^{c} (cf v l 25) —a) Ñ2 V B1 3 4 D5 7 राक्षसास्ते (for निवृत्तास्तु) Ś1 Ñ1 D2 3 अथ ते राक्षसा भूयो, D1 ते विशीर्णायुधा· सर्वे —b) D1 -[आ]शय- (for °श्रय-) Dm1 D8 -सश्रया, T3 Cm सश्रिता (for -निर्भया) —c) Ñ1 D1 T3 [अ]भ्यवर्तत, Dm1 D2 8 [अ]भ्य(D2 [आ]शु)धावत (for [अ]भ्यधावन्त) —d) Ñ2 V B1 3 4 D5 7 नानाप्रहरणा रणे —After 27, Ñ2 V B1 3 4 D5 7 read 23 —After 27, Dg1 Dt1 Dm1 D4 6 8 S (M2 after 28) ins

462* शूलमुद्गरहस्ताश्च पाशहस्ता महाबला ।
सृजन्त शरवर्षाणि शस्त्रवर्षाणि सयुगे ।
द्रुमवर्षाणि मुञ्चन्त शिलावर्षाणि राक्षसा ।

[(l 1) Dg1 D4 T G3 M1 चाप- (for पाश-) —(l 2) M1 शर (sic) (for शस्त्र) D4 damaged for शस्त्रवर्षाणि]

28 B3 4 read 28^{ab} after 458* —a) D1 तदद्भुत (for तद्बभूव) Ś1 Ñ1 D2 3 तदद्भुतमभूद्युद्ध. —b) V B1 3 4 D1-3 5 7 लोम- (for रोम-) —After 28^{ab}, Ñ2 V B1 3 4 D5 7 ins

463* अवर्तत महाघोर निशाचरविनाशनम् ।
ततो रामो महाबाहु सधायास्त्र महाबलम् ।
गान्धर्व नाम विख्यात मुमोचायतलोचन ।
ततस्ते राक्षसास्तत्र गान्धर्वास्त्रेण मोहिता ।
अथ रामस्त्वय राम इति कालेन चोदिता ।
अन्योन्य समरे जघ्नुरुपेत्य परमायुधै ।
ते निनिर्भिन्ननयना विनिवृत्तशिरोधरा ।
अपतन्राक्षसास्तत्र निकृत्ता इव पादपा ।
ततोऽवशेष तु तथैव राघव
खरावशेष क्षयदुर्बल बली ।
जघान राम स्थिरधर्मपौरुषो
रिपोर्बल दुष्प्रतिवारणै शरै ।

[(l 1) V -निषूदन (for -विनाशनम्) —(l 3) Ñ2 V1 गधर्व (for गान्धर्व) —(l 4) V B1 गधर्व- (for गान्धर्व-) —(l 5) V2 B4 मोहिता (for चोदिता) —(l 6) B3 उत्पत्य (for उपेत्य) —(l 7) Ñ2 B1 विनिर्भग्न- (for °भिन्न-) Ñ2 V2 B4 D7 विनिकृत्त, V1 B3 (also) विनिर्भिन्न- (for विनिवृत्त-) —(l 8) D7 निष्टेत्ता (sic) (for निकृत्ता) —(l. 10) Ñ2 D5 7 बले.., V1 वशी (for बली) —(l 11) B1 3 स्थित- (for स्थिर-) Ñ2 D5 7 -मुष्टिमायकैर् (for -धर्मपौरुषो) —(l 12) V2 B4 रक्षो- (for रिपोर्). Ñ2 D5 7 भय च नैष्यन्मुनिसघसभव]

—Ñ2 V B1 3 4 D5 7 om 28^{cd} —c) D1 4 T1 G1 2 M1 3 च, M2 तु (for [अ]स्य) Ś1 Ñ1 D2 3 रामस्य च महाबाहो —After 28, M2 ins 462* and thereafter cont; while Dg1 Dt1 Dm1 D1 4 6 8 T G M1 3 ins after 28 a passage relegated to App I (No 7)

Colophon —S1 Ñ1 D2 3 8 cont the Sarga. —*Sarga name* Ñ2 V B1 3 4 D5 7 खरसैन्यविध्वसन, D1 तुमुल युद्ध —*Sarga no* (figures, words or both) B1 3 om, Ñ2 V2 D5 7 31, V1 30, B4 33, Dg1 Dt1 Dm1 D4 6 8 T G M1 25, D1 27, M2 3 26 —After colophon, G concludes with श्रीरामाय नम

☞ After Sarga 24, D1 ins a passage (a different version of 24) given in App 1 (No 8)

२५

तद्द्रुमाणां शिलानां च वर्षं प्राणहरं महत् ।
प्रतिजग्राह धर्मात्मा राघवस्तीक्ष्णसायकैः ॥ १
प्रतिगृह्य च तद्वर्षं निमीलित इवर्षभः ।
रामः क्रोधं परं भेजे वधार्थं सर्वरक्षसाम् ॥ २
ततः क्रोधसमाविष्टः प्रदीप्त इव तेजसा ।
शरैरभ्यकिरत्सैन्यं सर्वतः सहदूषणम् ॥ ३ G 3 32 10 B 3 26 6 L 3 31 6

25

Ś1 D2 3 continue the previous sarga D8 begins with ॐ, T2 with श्रीरामचन्द्राय नम , M1 with श्रीरामाय नम Before 1, Ñ2 V B1 3 4 D5 7 ins

464* रक्षसामवशेष तु खरदूषणसश्रयम् ।
दुर्बल बलिन राममाहवे पुनरुत्थितम् ।
तेषामल्पावशेषाणा सगर्वमुपमर्पताम् ।
स्थित स्थिरमतिर्वीरो गर्विंतानामगर्वितः ।

[(l 4) V1 स्थिर, B3 (marg also as above) तत (for स्थित) D7 om गर्वितानाम],

while Dg1 Dt1 Dm1 D4 6 8 S ins

465* दूषणस्तु स्वक सैन्य हन्यमान निरीक्ष्य च ।
सदिदेश महाबाहुर्भीमवेगान्दुरासदान् ।
राक्षसान्पञ्चसाहस्रान्समरेष्वनिवर्तिन ।
ते शूलैः पट्टिशैः खड्गैः शिलावर्षैर्द्रुमैरपि ।
शरवर्षैरविच्छिन्न ववर्षुस्त समन्तत । [5]

[(l 1) M3 स्वय (for स्वक) Dt1 Dm1 D6 8 विलोक्य (for निरीक्ष्य) D4 T1 स, G1 तत् (for च) —(l 2) D8 सुरासदान् (for दुरा°) —Dg1 reads l. 3 in marg —(l 4) M2 3 तै (for ते) Dg1 (before corr as above) D4 S पट्टिशै Dt1 -वर्ष (for -वर्षैर्) —(l 5) D6 इव छिन्न, G1 अविच्छिन्नैर् (for अविच्छिन्न) D4 ददृशुस्, K(ed) ववृषुस् (for ववर्षुस्) G1 2 M ते (for त)]

1 D1 om 1–3 —ab) Dg1 T G1 2 M1 3 Cm g स, Dm1 त, D4 न (for तद्) Ś1 D2 नगाना, Ñ1 शराणा (for शिलाना) G1 प्रहरता (for प्राणहर) Ñ2 V B1 3 4 D5 7 तेषा शस्त्रमय वर्षं भीषण लो(B1 रो)महर्षणं —cd) G2 धर्मज्ञो (for धर्मात्मा) Ś1 Ñ1 D2 3 राघवोमोघसायकैः (Ñ1 D3 °क) (for d) Ñ2 V B1 3 4 D5 7 प्रहृष्ट (B3 °ष्ट) प्रतिजग्राह राघवो निशितै शरै

2 D1 om 2 (cf v l 1) —a) Ś1 D2 3 G1 तु (for च) M2 3 सर्वं (for वर्षं) —b) Dg1 समीलित (for निमीलित) Ś1 Ñ1 D2 3 सुमहत्पर्वतोपम(Ñ1 °म) —cd) Dg1 Dt1 Dm1 D4 6 8 G3 M3 लेभे (for भेजे) Ś1 Ñ1 D2 3 चुक्रोध राघवस्तेषा वधे चैव मनो दधे —For 2, Ñ2 V B1 3 4 D5 7 subst

466* प्रतिगृह्य तु तद्वर्षं घोर शत्रुनिपूदन ।
शारद स्थूलपृषत शृङ्गाभ्या गोवृषो यथा ।
तत क्रोधसमाविष्ट. कालान्तकयमोपम ।
दिव्य समाददे सोऽस्त्र वधार्थं सर्वरक्षसाम् ।

[(l 1) Ñ2 V2 D5 7 त (for तद्) V1 शत्रुनिषूदन —(l 2) B1 शारदाम्बुदवर्ष तु (for the prior half) B4 वृषभो (for गोवृषो) —(l 4) V B4 समादधे]

—Thereafter all cont

467* उद्यत तु खरो दृष्ट्वा ह्यस्त्र राक्षसनाशनम् ।
ततो मायामय दिव्यमस्त्र चिक्षेप राघवे ।
राघवस्तु ततो दृष्ट्वा तदस्त्र दीप्तमोजसा ।
मायास्त्रेणैव हत्वा तु तदस्त्र पुनराददे ।
हत्वा च राक्षसश्रेष्ठान्खरदूषणसश्रितान् । [5]
अवशेष बल सर्वं निहन्तुमुपचक्रमे ।
प्रत्यासन्नास्ततो राम राक्षसा बलदर्पिता ।
सावज्ञ प्रत्ययुध्यन्त राघव शत्रुसूदनम् ।

[(l 1) V1 D7 उद्यत —(l 3) V B1 दीप्ततेजसा —(l 4) V च (for [ए]व) V1 तत्, B3 च (for तु) —(l 5) V2 स हत्वा (for हत्वा च) Ñ2 B4 D7 राक्षसान् (for राक्षस-) Ñ2 D5 7 सश्रयान् (for सश्रितान्) —(l. 6) V1 अवशेषबल सर्व (for the prior half) B4 अवशेष बल हतु सर्वं समुपचक्रमे —(l 7) V B3 4 D5 अत्यासन्नास् (for प्रत्यासन्नास्) Ñ2 D5 7 राघव (for राक्षसा) V1 रणदर्पिता, V2 रणगर्विता, B3 बलगर्विता (for बलदर्पिता)]

3 D1 om 3 (cf v l 1) Ñ2 B4 D5 7 read 3 twice. —a) Ś1 Ñ2 B4 D2 3 5 7 (Ñ2 B4 D5 7 second time) स तु (for तत) —b) Ñ2 V B1 3 4 D5 7 M1 (Ñ2 B4 D5 7 first time) पावक (for तेजसा) Ś1 Ñ B4 D2 3 5 7 (Ñ2 B4 D5 7 second time) शत्रु(D3 °क्र)मर्मनि(Ś1 वि)कृतनै —c) Ś1 Dm1 D2 3 8 G3 अभ्यहनत्, Ñ1 चाभ्यहनत्, B1 3 (also) D4 T1 2 अवाकिरत् (for अभ्यकिरत्) Dm1 D8 G3 तूर्णं (for सैन्य) —d) Ñ2 V B1 3 D5 7 (all except V B1 first time) सर्वं सखरदूषण, Ñ2 B3 4 D5 7 (all except B3 second time) सर्वत खरदूषण —After 3, Ś1 Ñ V1 B3 4 D2 3 5 7 ins, D1 (om st 1–3) ins before 4, M2 ins l 6–16 only after 470*

468* विमुखीकृत्य रक्षांसि दूषण च महाबलम् ।
तस्थौ सख्ये चरन्राम प्रदीप्तानलसनिभ ।
राक्षसास्तात्रणे भग्नान्दृष्ट्वा रामेण धीमता ।
रथस्थो दूषणो राम शरवर्षैरवाकिरत् ।
सोऽतिविद्ध शरैस्तेन सर्वगात्रेषु राघव । [5]
क्रोधमाहारयत्तीव्र दूषण प्रति वीर्यवान् ।

G 3 32 11
B 3 26 6
L 3 31 15

ततः सेनापतिः क्रुद्धो दूषणः शत्रुदूषणः ।
जग्राह गिरिशृङ्गाभं परिघं रोमहर्षणम् ॥ ४
वेष्टितं काञ्चनैः पट्टैर्देवसैन्याभिमर्दनम् ।
आयसैः शङ्कुभिस्तीक्ष्णैः कीर्णं परवसोक्षितम् ॥ ५
वज्राशनिसमस्पर्शं परगोपुरदारणम् ।
तं महोरगसंकाशं प्रगृह्य परिघं रणे ।
दूषणोऽभ्यपतद्रामं क्रूरकर्मा निशाचरः ॥ ६

स चापमादाय रणे दूषणाभिमुखः स्थितः ।
मुमोच निशितान्बाणान्वज्रानिव शतक्रतुः ।
ततोऽस्य ध्वजमेकेन चतुर्भिश्चतुरो हयान् ।
त्रिभिश्चिच्छेद धर्मात्मा द्वाभ्यां तु रथसारथिम् ।
न्यकृन्तद्राघवः क्रुद्धः शरैरग्निशिखोपमैः ।
आयुधानि च सर्वाणि चिच्छेद लघुहस्तवत् ।
स हताश्वो हतरथो भूमौ निष्ठन्निशाचरः ।
गदां चिक्षेप रामाय प्रदीप्तामशनीमिव ।
तामापतन्तीं चिच्छेद राघवो निशितैः शरैः ।
दूषणं चाष्टभिर्बाणैर्विव्याध लघुहस्तवत् ।

[D1 om l 1–2 —(l 1) Ñ2 B4 D6 7 महारथ (for महाबलम्) —(l 2) Ś1 तस्यां चासभ्रमो, Ñ1 D2 3 तस्यासभ्रमो, V1 तस्यावसभ्रमाद्, B3 4 तयो चासभ्रमाद् (for तस्यां सख्ये चरन्) Ś1 सप्रभ, D2 -मनिभ (for सनिभ) —(l 3) Ñ2 B3 4 D6 7 सयुगे (for धीमता) —(l 5) D1 सस्मारेण —(l 6) Ñ2 B4 D6 7 अभ्याहरत (for आहारयत्) Ñ2 B3 4 D6 7 रा(Ñ2 र)क्षस प्रति, D1 प्रति सयुगे, M2 प्रति राक्षस (for प्रति वीर्यवान्) —(l 7) Ñ1 आनम्य, Ñ2 B3 4 D6 7 M2 उद्यम्य, D2 3 आयम्य (for आदाय) V1 स चापरान्शरान्दृष्ट्वा, D1 स चाप मण्डलीकृत्य (for the prior half) Ñ2 V1 D6 7 दूषणोभि- (for दूषणाभि-) D2 -[अ]भिमुख स्थित —(l 8) Ñ1 V1 D1 2 M2 वज्राणीव B4 शतानि च (for शतक्रतु) —After l 8, D1 ins

468(A)* दूषणोऽपि शरांस्तीक्ष्णाञ्ज्वलितान्भुजगानिव ।
राघवाभिमुखान्सृष्ट्वा क्षिपञ्शतसहस्रश ।
अथ रामो महाबाहुस्तूर्णमुद्धृत्य सायकान् ।
ब्रह्मदण्डोपमांस्तीक्ष्णान्सधाय धनुषि क्षुरान् ।

—After l 9, D1 ins

468(B)* पञ्चेन तु शिरः कायात्पातयामास सारथे ।

—(l 10) Ñ2 D6 7 च तथा, B4 च तदा, D1 बलवान् (for धर्मात्मा) B3 त्रिभिस्तु रथ च तदा (for the prior half) Ñ2 B3 4 D3 5 7 M2 च (for तु) V1 द्वाभ्यामथ समारथिं, D1 द्वाभ्यामक्षौ महाबल (for the post half) —(l 11) Ś1 निकृत्य, V1 व्याकृन्तन्, B3 निकृन्तन्, D3 निकृन्तद्, M2 व्यहनद् (for न्यकृन्तद्) —For l 11, D1 subst l. 1 and then cont l 2

468(C)* द्वादशेन तु बाणेन धनुश्चिच्छेद राघव ।
रक्षसस्तु सुसंक्रुद्धो बाणैराशीविषोपमैः ।

—(l 12) M2 चित्राणि (for सर्वाणि) Ñ2 B3 4 D6 7 M2 लघुविक्रम (for °हस्तवत्) D1 चिक्षेप अशनीमिव (for the post half) —D1 om l 13–14 —(l 14) D2 reads गदा in marg M2 रामाय चिक्षेप (by transp) Ñ2 B3 4 D6 7 गदामादाय चिक्षेप वासवस्त्वशनीमिव —(l 16) Ś1 बहुभिर् (for चाष्टभिर्) Ñ2 पञ्चभिर्, B3 4 D6 7 पञ्चभिर्, M2 त्वग्भिर्, (for °हस्तवत्) V1 बाणैश्चतुर्भिर्वाप दूषणं त्वरितस्तत].

—while M2 ins after 3

469* तान्दृष्ट्वा निहतान्सर्वे राक्षसान्परमातुरान् ।
ननाद विविधानादान्नाम परपुरंजय ।

4 ^{b}) Ñ2 V B1 3 4 D1 5 7 शत्रुसूदन, D2 3 शत्रुदूषण; G(ed) भीमविक्रम (for शत्रुदूषण) —After 4^{ab}, Dg1 Dt1 Dm1 D4 6 8 T G M1 3 ins, M2 ins l 1–2 only after 4^{ab}

470* शरैरशनिकल्पैस्तु राघवं समवाकिरत् ।
ततो रामः सुसंक्रुद्धः क्षुरेणास्य महद्धनुः ।
चिच्छेद समरे वीरश्चतुर्भिश्चतुरो हयान् ।
हत्वा चाश्वाञ्शरैस्तीक्ष्णैरर्धचन्द्रेण सारथेः ।
शिरो जहार तद्रक्षस्त्रिभिर्विव्याध वक्षसि ।
स छिन्नधन्वा विरथो हताश्वो हतसारथिः ।

[(l 1) Dt1 D4 तु, G1 2 M2 3 च (for त) —(l 2) Dt1 D6 स सक्रुद्ध M1 ततो रामेण सक्रुद्ध (for the prior half) M2 क्षुरप्रेणास्य तद्धनु (for the post half) —(l 3) G1 M3 समरे रामश्, G3 चतुरो रामश् (for समरे वीरश्) —(l 4) M1 [अ]स्य (for [अ]श्वान्) —D4 om (hapl) from रथं in l 4 up to st 5^{c} —(l 6) T1 M3 सच्छिन्नधन्वा]

—Thereafter M2 cont l 6–16 of 468*

—^{cd}) Ñ2 V B1 3 4 D6 7 घोरदर्शन, Dt1 लोमहर्षण (for रोम°) Ś1 Ñ1 D1–3 जग्राह परिघ(Ś1 परम) घोरमायस वज्रसनिभ(D1 सूर्यवर्चस), M2 दूषणोथ समादाय परिघ भास्करप्रभ —After 4, D1 ins

471* यमदण्डप्रतीकाश भीम शत्रुनिबर्हणम् ।

—After 4, G3 ins 472*

5 D4 om 5^{abc} (cf v l 470*) For 5–6^{b}, M3 subst. 472* —^{a}) V1 वेष्टितै, D3 चिष्टित (for वेष्टित) Ś1 D2 पत्रैर् (for पट्टैर्) —^{b}) Dg1 देवसेना- (for देवसैन्य-) Ś1 Ñ V B1 3 4 D2 3 5 M2 बलवानतरोपम, D1 आमयव्रततो यथा, M1 देवसैन्यविमर्दन, K(ed) देवसैन्यप्रमर्दन —^{c}) Ñ1 आयुधै (for आयसै) Ś1 Ñ1 D2 3 दीप्तै, Dg1 कीर्णं (for तीक्ष्णै) —^{d}) Dg1 तीक्ष्णै (for कीर्णं) Ś1 Ñ1 D1–3 सयुत(D1 सकीर्णं) शोणितोक्षित, Ñ2 V B1 3 4 D5 7 सर्वत परिवारित(B3 °वेष्टित), M2 सयुक्त रुधिरोक्षित

6 ^{a}) M2 इन्द्राशनि —^{b}) Ś1 D2 परिघ परदारु(D2 °र) ण, Ñ2 V B1 3 4 D5 7 शत्रुदेहविदारण, Dg1 Dt1 D3 4 6 8 T3 G2 3 M1 पु(Dt1 D6 G2 प)रगोपुरदारु(Dg1 D8 G3 M1

तस्याभिपतमानस्य दूषणस्य स राघवः ।
द्वाभ्यां शराभ्यां चिच्छेद सहस्ताभरणौ भुजौ ॥ ७

भ्रष्टस्तस्य महाकायः पपात रणमूर्धनि ।
परिघश्छिन्नहस्तस्य शक्रध्वज इवाग्रतः ॥ ८

G 3. 32 19
B 3 26 14
L 3 31 27

°र)ण, D1 रथाश्वगजसून्न ❀ Ct शत्रूणा गात्र इन्द्रियाणि तेपा पुर शरीर तस्य दारण विदारणम्। यद्वा पुरद्वारविदारणम् ❀ —M3 subst for 5–6^{b}, Ś1 Ñ V B1 3 4 D1–3 5 7 G2 M1 2 ins after 6^{ab}, G3 ins after 4

472* त्रासन सर्वभूताना काञ्चनाङ्गदभूषणम् ।

[Ś1 Ñ1 D2 3 धारिण (for भूषणम्) D1 गिरिसारमय दृढ (for the post half)]

Ñ2 V B1 3 4 D5 7 cont

473* यमदण्डोपम घोर तीक्ष्ण परमशोभितम् ।

[V1 तूर्णं (for तीक्ष्ण) V1 B4 D5 7 परमशोभन]

—^{c}) Ś1 महावेग- (for महोरग-) —^{d}) Ñ2 V B1 3 4 D5 7 महत्, D1 मृधे (for रणे) —^{e}) Ś1 Ñ1 D2 [ऽ]भ्य(D3 [ऽ]भि)पतत्तर्णं, Ñ2 B4 Dg1 D1 4 5 7 T1 [ऽ]भ्यद्रवद्रामं, V1 न्यपतद्राम, B1 [ऽ]भ्येत्य तद्राम, D3 [ऽ]भ्यहनत्तूर्णं —^{f}) Ś1 D2 3 हतोसीति वदन्रणे, Ñ1 दूषणाभ्यवदन्रणे (sic), Ñ2 B1 3 4 D6 7 वृत्र शत्रुमिवासुर, V वृत्र शक्रमिवासुर (V1 °हरेत्), D1 M2 पतग इव पावक, M3 कृतकर्मा निशाचर —After 6, D1 reads (preceded by 475* and 476*) 11–15 (including star passages) —After 6, Ś1 D2 ins, D1 cont after 486*

474* भर्त्सयामास सकृद्दृश्चित्र विस्फार्य कार्मुकम् ।
रे रे रक्षोधम क्रूर वृथा तव पराक्रम ।
प्रतियुध्यस्व समरे मया सार्धं निशाचर ।
ये त्वया भक्षिता पूर्वं दण्डकारण्यवासिन ।
द्रक्ष्यन्ति त्वा मृत तेऽद्य मुनय संशितव्रता ।
राघवेणैवमुक्तस्तु दूषण परुष वच ।
प्रत्युवाच तदा राम क्रोधविस्फारितेक्षण ।
प्राकृतान्राक्षसान्हत्वा शूरोऽहमिति मन्यसे ।
परिघस्य प्रहार तु सहस्व मम सयुगे ।
एवमुक्तस्ततो रक्षो राम रक्तान्तलोचनम् ।
उद्यम्य परिघ घोर राघवाभिमुखो ययौ ।

[(l 1) D1 स्फार्य च (for विस्फार्य) —(l 2) D1 2 नाम (for तव) —(l 3) D1 एहि युध्यस्व (for प्रति°) —(l 6) D1 एवमुक्तस्तु रामेण (for the prior half) —(l 10) D1 2 एवमुक्त्वा (for °मुक्तस्) —(l 11) L(ed) नुद्यमान स्वपरिघ (for the prior half)]

—After 6, D1 M2 ins

475* त कालदण्डप्रतिम भ्रामयन्नेव दूषण ।

—D1 cont

476* अभिदुद्राव काकुत्स्थ हतोऽसीति वदन्रणे ।

—After 475*, M2 cont

477* परावमर्दन गृह्य परिघ राक्षसोत्तम ।
दूषण परमक्रुद्धो हतोऽसीति वदन्रणे ।,

whereas Ñ2 V B1 3 4 D5 7 ins after 6

478* तस्याभिपततस्तूर्णं दूषणस्य स राघव ।
शरैरापूरयद्राम परिघ क्रोधमूर्छित ।
ते शरा राघवोत्सृष्टा आसाद्य परिघ शिता ।
कुण्ठधारा क्षिति जग्मु शतशीर्षा इवोरगा ।
ततो दूषणमायान्त दृष्ट्वा परिघधारिणम् ।
वधेप्सु त रोषदीप्त दण्डहस्तमिवान्तकम् ।

[(l 1) V B1 3 4 सख्ये (for तूर्णं) —(l 2) B4 om from घ up to त D7 क्रोधमूर्छित —(l 4) G(ed) नतशीर्षा —(l 6) Ñ2 B4 D5 7 रोषदीप्त त (by transp), V1 रोषसंदीप्त, V2 क्रोधदीप्त त (for त रोषदीप्त)]

7 D3 reads from 7^{a} up to l 1 of 480* in marg, —^{a}) Ś1 Ñ V B1 3 तस्याभिपतत सख्ये, B4 तस्य चापतत, सख्ये —^{b}) G2 M2 3 च (for स) —^{c}) Ñ2 B4 D7 क्षुराभ्यां (for शराभ्या) —^{d}) Ñ2 सशस्त्र, D5 7 सशस्त्र- (for सहस्त-) B1 प्रशस्ताभरणौ भुजौ —For 7, D1 subst and reads after 474*

479* तस्योद्यतौ भुजौ द्वाभ्या क्षुराभ्या रघुनन्दन ।
अकृन्तत्स महाबाहु स्कन्धदेशान्महाबल ।
छित्वा तस्य भुजौ राम प्रहसन्राक्षसस्य वै ।
परिघ त महाघोर नियत त ददर्श ह ।

—After 7, Ś1 Ñ1 D2 3 ins, M2 ins. l 1 and 4, while V1 ins l 3 only after 9

480* तस्य छित्वा भुजौ राम प्रहसन्रघुनन्दन ।
ज्याघाततलशब्देन रक्षसा भयमादधे ।
भूर्दिश ख च घोषेण सर्वतोऽप्यनुनादयन् ।
परिघ च महाघोर पातयामास पश्यत ।

[(l 1) D3 तत छित्वा, M2 हित्वा तस्य (for तस्य छित्वा) D3 राघवो रणे (for रघुनन्दन) —(l 2) Ñ1 ज्याघोषतलशब्देन, V1 ज्याशब्दतलघोषेण, D3 ज्याघोषतलघोषेण (for the prior half) Ñ1 V1 D2 3 आदधत् (for आदधे) —(l 3) Ś1 भूरिश (for भूर्दिश) Ñ1 शब्देन, V1 वेगेन (for घोषेण) Ñ1 V1 [ऽ]त्यनुनादयन् —(l 4) M2 त (for च) D3 यथा (for महा) M2 पतमान ददर्श स (for the post half)]

8 ^{a}) Ś1 ततस्, B3 हरतस्, D2 सोस्तस्, D3 G1 स्रस्तस् (for भ्रष्टस्) Dg1 भ्रष्टहस्तो, D1 पृष्ठतश्च (for भ्रष्टस्तस्य) Ñ1 D4 T1 महाकायात्, Ñ2 V B1 3 4 D5 7 महाघोर, D1 महाकाय, D2 महावेग (for महाकाय) —^{b}) D1 धरणीतले (for रणमूर्धनि) —After 8^{ab}, B3 ins

481* पतिते च तदा हस्ते रक्षसो व्याकुलोऽभवत् ।

G. 3 32 20 B. 3. 26 15 L. 3 31 28 स कराभ्यां विकीर्णाभ्यां पपात भुवि दूषणः ।
विषाणाभ्यां विशीर्णाभ्यां मनस्वीव महागजः ॥ ९
दृष्ट्वा तं पतितं भूमौ दूषणं निहतं रणे ।
साधु साध्विति काकुत्स्थं सर्वभूतान्यपूजयन् ॥ १०
एतस्मिन्नन्तरे क्रुद्धास्त्रयः सेनाग्रयायिनः ।
संहत्याभ्यद्रवन्रामं मृत्युपाशावपाशिताः ।
महाकपालः स्थूलाक्षः प्रमाथी च महाबलः ॥ ११
महाकपालो विपुलं शूलमुद्यम्य राक्षसः ।
स्थूलाक्षः पट्टिशं गृह्य प्रमाथी च परश्वधम् ॥ १२
दृष्ट्वैवापततस्तांस्तु राघवः सायकैः शितैः ।
तीक्ष्णाग्रैः प्रतिजग्राह संप्राप्तानतिथीनिव ॥ १३
महाकपालस्य शिरश्चिच्छेद रघुनन्दनः ।
असंख्येयैस्तु बाणौघैः प्रममाथ प्रमाथिनम् ॥ १४

—c) D3 परिघ (for परिघवृत्) Dg1 तस्य विच्छिन्नहस्तस्य, D1 परिघच्छिन्नहस्तस्य —d) Ñ2 शत्रुध्वज (for शक्र°) Ñ1 इवोत्थित, D4 T1 इवोच्छ्रित, M3 इवापर (for इवाग्रत) —After 8, Dt1 ins रामचन्द्राय नम

9 a) Dt1 D6 कराभ्या च (for स कराभ्या) Ś1 Ñ1 Dg1 D3 4 T3 G2 M1 विशीर्णाभ्या, D1 M2 निकृत्ताभ्या, D2 विदीर्णाभ्या (for विकीर्णाभ्या) Ñ2 V B1 3 4 D5 7 स भुजाभ्या निकृत्ताभ्या —b) D3 रणमूर्धनि (for भुवि दूषण) ❁ Ct विकीर्णाभ्या विक्षिप्ताभ्या भुजाभ्यामुपलक्षितो दूषणश्च पपात विगतासुरिति शेष ❁ —c) Ś1 Ñ1 D1–3 M2 निकृत्ताभ्या, B1 विजीर्णाभ्या, D4 T2 विकीर्णाभ्या (for विशीर्णाभ्या) —d) Ś1 Ñ V2 B3 4 D1–3 5 7 M2 विरण्ण(D1 अरण्य, M2 विपड) इव कुजर, V1 B1 यथा हैमवतो गज —After 9, V1 ins l 1–3 of 480*

10 a) Ñ1 G3 त दृष्ट्वा (by transp), Dt1 om (for दृष्ट्वा त) Ñ1 परिघ, G2 M3 निहत (for पतित) Ś1 Ñ2 V B1 3 4 D1–3 5 7 M2 सपरिघ (for त पतित) Ñ2 V B1 3 4 D5 7 तत्र (for भूमौ) —b) Ś1 पातित, M3 पतित (for दूषण) Ś1 तेन तद्, Ñ V B1 3 4 D1–3 5 7 पतित, M3 दूषण (for निहत) Ñ2 V B1 3 4 D5 7 भुवि (for रणे) —c) Ś1 Ñ1 Dg1 D2 3 T3 M2 भूतानि (for काकुत्स्थ) —d) Ś1 Ñ1 D2 3 M2 राघव प्रत्य(M2 सम)पूजयन्, Dg1 T3 काकुत्स्थ समपूजयन्, D6 सर्वलोकान्यपूजयन् ❁ Cg तमिति। अपूजयन् अस्तुवन् ❁ —After 10, Ñ2 B1 3 4 D5 7 ins, V ins after 16

482* यत्र यत्र च वीक्षेत राघवो राक्षसान्रणे।
तत्रैव निहतास्तेन न शेकुरभिवर्तितुम्।

[(l 1) V परीक्षेत, D5 च विक्षेप (for च वीक्षेत) —(l 2) V D5 अतिवर्तितु]

11 For sequence of st 11–15 in D1, cf v l 6 —a) Ś1 D2 क्रास (for क्रुद्धास) —b) D1 तत (for त्रय) M2 3 सेनाग्रनायका Ś1 Ñ V B1 3 4 D2 3 5 7 विक्राता राक्षसास्त्रय —Ś1 Ñ1 V1 D2 3 transp cd and ef —e) Ś1 Ñ1 V1 D2 3 M1 सहसा, Ñ2 B1 3 4 D5 7 सहिता (for सहत्य) Dg1 G1 [अ]भिद्रवन्, D5 7 ह्यद्रवन्, G3 [अ]भ्यपतन् (for [अ]भ्यद्रवन्) —d) Ś1 Ñ2 B1 3 4 D2 3 5 7 मृत्युपाशवशं गता, V1 मृत्युपाशावशं गता, M2 पतगा इव पावक ❁ Ct महत्य मिलित्वा। मृत्युपाशेनावपाशिता बद्धा ❁ —For 11abcd, D1 subst.

483* दूषण निहत दृष्ट्वा हताश्च हतसारथिम्।
सचिवा दूषणस्यैव राघव पर्यवारयन्।

—Ñ2 V2 B1 3 4 D5 7 om (hapl) 11ef. —e) M1 महाकलाप(meta) (for °कपाल). D6 सालाक्ष (for स्थूलाक्ष) —f) D1 रक्षसा वर (for च महाबल) —After 11, D1 ins

484* राघव ते त्रयो रक्षा अर्दयन्समरे स्थिता ।

12 For sequence of st 11–15 in D1, cf v l 6 —a) Ś1 D2 3 विमल, Ñ1 दुष्टात्मा (for विपुल) —b) D1 राक्षस, M2 चायस (for राक्षस) ❁ Cv प्रमाथी च महाबल इत्यत पर महाकपालो विपुल शूलमुद्यम्य राक्षस इत्येतदन्त कोशेषु लेखक प्रमादात् पातत ❁ —c) Dg1 D4 S पट्टस, D5 परिघ (for पट्टिश) —d) Ñ1 महाबल (for परश्वधम्)

13 For sequence of st 11–15 in D1, cf v l 6 —a) Ñ2 B1 3 4 D5 7 च (for [तु]व) K(ed) तूर्णं (for तास्तु) Ś1 Ñ1 V D2 3 [आ]पतमानास्तान्, Ñ2 B1 3 4 D1 5 7 [आ]पतमानानि, G(ed) धावमानास्तान् (for [आ]पततस्तास्तु) —b) Ś1 Ñ1 V1 D2 3 त्रिभि (for शितै). Ñ2 B1 3 D1 5 7 तानि रक्षासि राघव, V2 राक्षसान्राघव शरै, B4 रक्षासि तानि राघव —c) Ñ2 B1 3 4 D5 7 क्षुरप्रै, D1 सुतीक्ष्णै, D3 क्षीणाग्रैश (for तीक्ष्णाग्रै) Ś1 D2 अभिजग्राह, Ñ1 चापि जग्राह, D3 च निजग्राह (for प्रतिजग्राह) —d) Ś1 Ñ V B1 3 4 D1–3 5 7 सत्कारैर् (for संप्राप्तान्) Ñ1 यथा (for इव)

14 For sequence of st 11–15 in D1, cf v l 6 —a) M1 महाकलापस्य —b) Ś1 Ñ2 V B1 3 4 D2 3 5 7 [ए]कैपुणैव(Ñ2 V1 B1 3 4 D5 7 °णा च) स, D1 [ए]कैपुणा सह, D4 T1 2 G1 2 M2 3 परमेषुभि (T G2 °णा) (for रघुनन्दन) Ñ1 चिच्छेदादाय कार्मुक —c) Ś1 Ñ V B4 D2 3 5 7 बाणैश्च बहुभि(Ñ1 विविधै)स्तीक्ष्ण (D5 °ै), B1 3 बाणैर्बहुविधैस्तीक्ष्णै, D1 बाणैश्च दशभिस्तीक्ष्णै

स्थूलाक्षस्याक्षिणी तीक्ष्णैः पूरयामास सायकैः ।
स पपात हतो भूमौ विटपीव महाद्रुमः ॥ १५
ततः पावकसंकाशैर्हेमवज्रविभूषितैः ।
जघान शेषं तेजस्वी तस्य सैन्यस्य सायकैः ॥ १६
ते रुक्मपुङ्खा विशिखाः सधूमा इव पावकाः ।
निजघ्नुस्तानि रक्षांसि वज्रा इव महाद्रुमान् ॥ १७
रक्षसां तु शतं रामः शतेनैकेन कर्णिना ।
सहस्रं च सहस्रेण जघान रणमूर्धनि ॥ १८
तैर्भिन्नवर्माभरणाश्छिन्नभिन्नशरासनाः ।
निपेतुः शोणितादिग्धा धरण्यां रजनीचराः ॥ १९

G 3 32 30
B 3 26 32
L 3 31 38

15 For sequence of st 11–15 in D1, cf v l 6 —[a]) Ñ B1 3 4 D1 7 च चक्षुषि, V2 तु चक्षुषि, Dg1 [अ]क्षिगोस्तीर्वे (sic), Dt1 D6 [अ]क्षिणी स्थूले (for [अ]क्षिणी तीक्ष्णै) —[b]) Ñ V2 B1 3 4 D5 7 मार्गणै (for सायकै) —[c]) V2 D1 ते निपेतु, Dg1 निपपात (for स पपात) Ś1 Ñ1 V1 D2 3 क्षितौ छिन्नो (V1 °न्ना), Ñ2 B1 3 4 D5 7 क्षितौ क्षीणे, V2 परिच्छिन्ना, Dg1 ततो भूमौ, D1 क्षण छिन्ना, G1 महान्भूमौ (for हतो भूमौ) —[d]) Ś1 V1 D2 3 विनिकृत्तो यथा द्रुम, Ñ1 भूयो रामशराहत, Ñ2 V2 B1 3 4 D5 7 हतो (V2 illeg) रामस्य सायकै, D1 भूमौ रामस्य सायकै —After 15, Dg1 Dt1 Dm1 D4 6 8 S ins

485* दूषणस्यानुगान्पञ्चसाहस्रान्कुपित क्षणात् ।
हत्वा तु पञ्चसाहस्रैरनयद्यमसादनम् ।
दूषण निहत दृष्ट्वा तस्य चैव पदानुगान् ।
व्यादिदेश खर क्रुद्ध सेनाध्यक्षान्महाबलान् ।
अथ विनिहत सख्ये दूषण सपदानुग ।
महत्या सेनया सार्धं युद्ध्वा राम कुमानुषम् ।
शस्त्रैर्नानाविधाकारैर्हनध्व सर्वराक्षसा ।
एवमुक्त्वा खर क्रुद्धो राममेवाभिदुद्रुवे ।
श्येनगामी पृथुग्रीवो यज्ञशत्रुर्विहगम ।
दुर्जय करवीराक्ष परुष कालकार्मुक ।
हेममाली महामाली सर्पास्यो रुधिराशन ।
द्वादशैते महावीर्या बलाध्यक्षा ससैनिका ।
राममेवाभ्यधावन्त विसृजन्त शरोत्तमान् ।

[(l 2) Dg1 हत्वा तान्, D4 l1 2 G1 2 बाणौघै, T3 हत्वा त (for हत्वा तु) Dm1 D8 G3 पञ्चसाहस्रान्, M3 पञ्चसाहस्रम् Dt1 D6 तान्नयद् (for अनयद्) —(l 3) G1 च हत (for निहत) Dt1 D6 श्रुत्वा (for दृष्ट्वा) Dg1 तस्यैव च (by transp) (for तस्य चैव) G1 वशानुगान् —(l 4) M1 2 तत (for खर) —(l 5) Dt1 विनिर्हित (sic) (for विनिहत) Dm1 D8 G2 3 शेते (for सख्ये) —(l 6) M1 युध्यमान (for युद्ध्वा राम) —(l 7) G2 नानाविधैर्घोरैर् —(l 9) G2 दशग्रीवो (for पृथु°) —(l 10) D6 G2 पुरुष (sic) (for परुष) —(l 11) D4 G M मेघमाली (for हेममाली) —(l 12) D4 ससैन्यका (for ससैनिका) —(l 13) Dg1 D4 T G1 2 M2 3 [अ]भ्यवर्तंत (for [अ]भ्यधावन्त)]

—After 15, D1 ins

486* अथ तान्राक्षसान्दृष्ट्वा पतितान्रणमूर्धनि ।
राघवास्त्रविनिर्दग्धान्पतगानिव पावक ।
दृष्ट्वैव दूषण क्रुद्धो सचिवान्निहतान्रणे ।
परिघ भ्रामयामास कालदण्डमिवोत्थितम् ।
त दृष्ट्वा राघवो रक्ष परिघायतपाणिनम् ।

—Then cont 474*

16 Ñ2 D5 7 om 16 —[a]) Ś1 तथा (for तत) —[b]) Ś1 Ñ1 V B1 3 4 D1–3 शरैर्हेमविभूषितै (B1 3 4 D1 °पणै) —[c]) V1 सर्वं (for शेष) D1 जघान बलिनस्तस्य —[d]) Ś1 Ñ1 V B1 3 4 D2 3 राक्षस (B1 3 4 D3 रक्षसा) सैन्यमाहवे, D1 तत्र सैन्यस्य राघव —After 16, V ins 482*

17 [a]) Ñ1 निशिता (for विशिखा) —[b]) G (ed) खे ग्रहा (for पावका) Ś1 Ñ1 D2 3 रामकार्मुकनि सृता, Ñ2 V B1 3 4 D1 5 7 सधूमा हेमभूषणा (D1 °पिता) —[d]) Ś1 Ñ V B1 3 4 D2 3 5 7 G2 M1 2 वज्राणीव, D1 यथा वज्रो, (for वज्रा इव) Ś1 D2 3 महीधरान्, Dm1 D8 G3 महासुरान्, M1 महाचलान् (for महाद्रुमान्)

18 [a]) D1 3 M1 2 राक्षसाना (for रक्षसा तु) Ś1 शतान्, G2 शर (sic) (for शत) —[b]) Dg1 Dm1 D8 G3 M2 शरेण, D4 शितेन, T3 शस्त्रेण (for शतेन) Ś1 D2 3 पत्रिणा (D3 °णा) (for कर्णिना) D1 एकेनैव त्रिकर्णिना —For 18[ab], Ñ2 V B1 3 4 D5 7 subst, Ñ1 subst l 2 only for 18[ab]

487* राक्षसाना शत हत्वा श्रेष्ठाना राघव पुन ।
एकैकेन जघानैक शरेण युधि राक्षसम् ।

[(l 1) D5 ज्येष्ठाना (for श्रेष्ठाना) —(l 2) Ñ1 एकैकेन, B1 4 एकेनव (for एकैकेन) B4 जघानक (for जघानैक) V2 शतेन (for शरेण) Ñ1 राक्षसान् (for राक्षसम्)]

—[c]) Dg1 Dt1 Dm1 D6 8 T3 G2 3 M1 3 तु (for च) —[d]) Ñ V B1 3 4 D5 7 शराणा निजघान स (Ñ1 ह), D1 जघान नृवरात्मज

19 [a]) Ś1 Ñ B1 3 4 D2 3 5 7 G1 3 M3 ते (for तैर्) Ś1 Ñ1 V B4 D2 3 छिन्न- (for भिन्न-) B1 -मर्म- (for वर्म-) Ñ2 V2 B1 3 4 D3 7 G2 -[आ]वरणाश् (for -[आ]भर°) —[b]) Ś1 D3 छिन्नभिन्नशिरोरुहा, Ñ2 D5 7 छिन्ना भिन्ना शराहता, V छिन्नभिन्नशराहता, B1 3 4 छिन्नभिन्ना शराहता, D2 छिन्नभिन्नशिरोधरा, T3 छिन्ना भिन्नशरासना —D3 reads 19[c]–21 in marg —[c]) V1 B4 D5–7 शोणितैर्दिग्धा, B1 3 शोणितैर्दिग्धैर् (for °तादिग्धा) —[d]) G (ed) पृथिव्या (for धरण्या) —For 19, D1 subst and reads after 20[ab]

G 3 32 31 तैर्मुक्तकेशैः समरे पतितैः शोणितोक्षितैः ।
B 3 26 33 आस्तीर्णा वसुधा कृत्स्ना महावेदिः कुशैरिव ॥ २०
L 3 31 39 क्षणेन तु महाघोरं वनं निहतराक्षसम् ।
बभूव निरयप्रख्यं मांसशोणितकर्दमम् ॥ २१
चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् ।
हतान्येकेन रामेण मानुषेण पदातिना ॥ २२
तस्य सैन्यस्य सर्वस्य खरः शेषो महारथः ।
राक्षसस्त्रिशिराश्चैव रामश्च रिपुसूदनः ॥ २३
ततस्तु तद्भीमबलं महाहवे
समीक्ष्य रामेण हतं बलीयसा ।
रथेन रामं महता खरस्ततः
समाससादेन्द्र इवोद्यताशनिः ॥ २४

इति श्रीरामायणे अरण्यकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

488* बभूव गिरिसंकाशैरावृतं धरणीतलम् ।
तैर्भिन्नैर्गिरिसंकाशैः पतितैर्वारणोपमैः ।

20 D3 reads 20 in marg (cf v l 19) —ab) D1 तैश्छिन्नहृदयैः सख्ये (for a) Ñ V B1 3 4 D5 7 पतितैः समरे (by transp) (for समरे पतितैः) —After 20ab, D1 reads 488* —c) Dt1 D6 Ct विस्तीर्णा (for आस्तीर्णा) Ś1 D2 3 रराज वसुधाकीर्णा, Ñ V B1 3 4 D5 7 व्यराजद्वसुधाकीर्णैः (Ñ1 V1 B1 °र्णा), D1 बभूव वसुधाकीर्णा —d) Ś1 B1 D3 मखवेदी, Ñ1 V2 B3 4 D2 5 7 मखे वेदी, Ñ2 मखे वेदि, V1 अभ्ये वेदी (sic), Dg1 D8 महावेदी, D1 महादिवै (sic) (for महावेदिः) D1 कुशैर्वेदिरिवाध्वरे

21 D3 reads 21 in marg (cf v l 19) —a) Ś1 Ñ1 D2 3 M2 क्षणेन तद्, Ñ2 V1 B1 3 4 D5 7 तत्क्षणेन V2 Dg1 Dt1 Dm1 D6 8 T3 तत्क्षणे तु (for क्षणेन तु) Ś1 Ñ1 बलं सर्वं, D2 M2 बलं घोरं, D3 वनं घोरं (for महाघोरं) D1 निःशब्दमिति तत्सर्वं —b) Ñ1 D2 3 M2 तदा, D1 दीनं (for वनं) Ñ2 V B1 3 4 D5 7 निहतकण्टकं (for निहतराक्षसम्) L(ed) तदानीं हतराक्षसं —For 21ab, G(ed) subst l 4 of 490* —c) Ś1 निरपेक्षं च (for निरयप्रख्यं) —After 21, Ś1 D2 3 ins

489* तैर्भिन्नगिरिसंकाशैः पतितैर्वारणोपमैः ।
निःशब्दमभवत्सर्वं दीनं निहतराक्षसम् ।

[cf 488* —(l 2) D3 दीनं सर्वं (by transp)], while Ñ2 V B1 3 4 D5 7 ins

490* तत्रान्ये शेरते भूमौ शरार्ता गतजीविताः ।
कूजन्त्यन्ये भ्रमन्त्यन्ये मत्ता इव शरार्दिताः ।
तद्बभूवार्तमहायोधं विप्रद्रुतनिशाचरम् ।
शून्यमायोधनं सर्वं रामबाणाग्निना हतम् ।

[(l 1) Ñ2 गतजीविकाः —(l 2) B3 वमन्त्यन्ये, D7 मरे भित्र (sic) (for भ्रमन्त्यन्ये) V1 B2 शराहताः (for शरार्दिताः) B1 G(ed) om l 3 —(l. 3) V2 तं हतं तु (sic), B4 तं हतार्त- V -महाघोरं (for महायोधं) Ñ2 D5.7 विप्रकीर्ण- (for विप्रद्रुत-) —G(ed) reads l 4 for 21ab —(l 4) G(ed) रणायोधनं (for आयो°)]

22 Ñ1 om 22-23 —b) M2 क्रूरकर्मणाम् (for भीम°) —d) D1 दूषणश्च निपातितः

23 Ñ1 om 23 (cf v.l 22) —a) D1 स तु (for तस्य) Ñ2 V B1 3 4 D3 5 7 G3 M2 सर्वस्य सैन्यस्य (by transp) —b) Ś1 D2 शिष्टोऽतिपौरुषात्, Ñ2 V B1 3 4 D5 7 G1 2 M शेषो महाबलः, D1 चैषो महाबलः, D3 शेषोऽतिपौरुषात् —d) G3 स (for च) Ñ2 B1 3 4 D5 7 हतशेषौ निशाचरौ, V हतशेषौ महाबलौ, D2 रामं तु रिपुसूदनं —After 23, Dg1 Dt1 Dm1 D4 6 8 S ins

491* शेषा हता महावीर्या राक्षसा रणमूर्धनि ।
घोरा दुर्विषहाः सर्वे लक्ष्मणस्याग्रजेन ते ।

[(l 1) D4 T1 2 G1 2 M2 3 महासत्त्वा (for महावीर्या) G1 2 M2 3 रणदुर्जया (for रणमूर्धनि)]

24 a) Dg1 D2 T3 G M1 तं (for तद्) Ś1 D1 2 भीमबलो (for भीमबलं) Ś1 D1 2 बलं रणे, D3 महारणे, M2 दुरासदं (for महाहवे) —b) Dg1 T3 सप्रेक्ष्य (for समीक्ष्य) D1 बलं (sic) (for हतं) Ś1 D2 च लीलया (for बलीयसा) —For 24ab, Ñ V B1 3 4 D5 7 subst

492* स दूषणं प्रेक्ष्य रणे निपातितं
निशाचरांश्चाप्रतिमान्रणोत्कटान् ।

[(l 1) B1 निपातितं रणे (by transp) —(l 2) B4 बलोत्कटान् (for रणो°)]

—c) Ś1 D2 तथेति (for रथेन) Ś1 स वरं, D4 महतं (sic) (for महता) Ś1 D2 स्वयं, Ñ V B1 3 4 D5 7 T2 G1 तदा, D4 तथा (for ततः) D3 स्वयं खरः (for खरस्ततः) D1 खरो रथेनैव महाबलस्तदा —d) D1 [ए]वम् (for [इ]न्द्र) Ś1 D2 3 समाससादेन्द्र(D3 °दु)मिवासुरेश्वरः, Ñ1 M3 °देंद्रमिवोद्यताशनिं, Ñ2 V B1 3 4 D5 7 समभ्यधावन्नमुचिर्यथा हरिं, M1 °द्यतायुधः, M2 ससार खद्योत इवोद्यतं शशिं

२६

खरं तु रामाभिमुखं प्रयान्तं वाहिनीपतिः ।
राक्षसस्त्रिशिरा नाम संनिपत्येदमब्रवीत् ॥ १
मां नियोजय विक्रान्त संनिवर्तस्व साहसात् ।
पश्य रामं महाबाहुं संयुगे विनिपातितम् ॥ २
प्रतिजानामि ते सत्यमायुधं चाहमालभे ।
यथा रामं वधिष्यामि वधार्हं सर्वरक्षसाम् ॥ ३
अहं वास्य रणे मृत्युरेष वा समरे मम ।
विनिवर्त्य रणोत्साहं मुहूर्तं प्राश्निको भव ॥ ४
प्रहृष्टो वा हते रामे जनस्थानं प्रयास्यसि ।
मयि वा निहते रामं संयुगायोपयास्यसि ॥ ५
खरस्त्रिशिरसा तेन मृत्युलोभात्प्रसादितः ।
गच्छ युध्येत्यनुज्ञातो राघवाभिमुखो ययौ ॥ ६

G 3 33 7
B 3 27 6
L 3 32 8

Colophon —*Sarga name* Ś1 Ñ2 V B1 3 4 D1–3 5 7 दूषणवध, Ñ1 दूषणो नाम, G1 सैन्यविध्वसन —*Sarga no* (figures, words or both) Ś1 Ñ1 B1 D2 om, Ñ2 V2 D7 32, V1 D5 31, B3 33, B4 34, Dg1 Dt1 Dm1 D4 6 8 T G M1 26, D1 30, D3 36, M2 3 27, L(ed) 31 —After colophon, G concludes with श्रीरामाय नम

26

D8 begins with ॐ, M1 with श्रीरामाय नम —Before 1, Ś1 D1 2 ins

493* त दृष्ट्वा राक्षस सैन्यमनिग्राह्य महाबलम् ।
हतमेकेन रामेण दूषण च निपातितम् ।

[Cf 3 27 2 —(l 1) Ś1 तद् (for त) D1 अविषह्य (for अनिग्राह्य)],
while Dg1 ins

494* त्रिशिर शिरसा छेद दृष्ट्वा तेन सुसेविनाम् ।
दु खत्रयनिहन्तार लक्ष्मणाग्रजमाश्रये ।

[(l 1) B1 2 [आ]श्रमे (for -[आ]श्रये) —(l 4) V1 [illegible] (for [illegible]) Ñ2 [आ]हृत, V1 B3 (sup lin also) [इ]ति (for [आ]द्भुतम्). —(l 5) Ñ2 D5 7 [illegible] (for वाक्येन) V1 B4 पक्षि तु (for पक्षीन्द्र) B4 पथा —(l 7) B1 2 [illegible] (for तु) V1 तु (for च) —(l 8) Ñ2 [illegible] (for स) B1 4 -गर्जित- (for -गर्जित-) Ñ2 V1 D7 -निस्वन —(l 10) B1 तत्र (for सोऽथ) D5 जनकात्मजां (for तां च जानकीम्)]

2 G (ed) om from 2a up to l 1 of 940* —a) Dg1 Dm1 D3 T2 G3 M1 सकाशस् (for -कूटाभस्) —b) D1 -तुण्ड, D2 7 दंष्ट्र, D4 शृङ्ग (for -तुण्ड) Ñ1 illeg, Dm1 D3 G1 2 -खगेश्वर (for खगोत्तम) —After 2ab, Ñ2 V1 B1 3 4 D5 7 ins.

940* अपश्यद्रावण तत्र हरन्त जनकात्मजाम् ।
ह्रियमाणा तु तां दृष्ट्वा स्नुपामय स पक्षिराट् ।
क्रोधेन महताविष्टो वेगेनोत्पतितो नभ ।
समुत्पत्य च पक्षी तु स बली तस्य रक्षस ।
रथमार्गमवष्टभ्य स्थित क्रोधादिव ज्वलन् ।
स रुद्ध्वा रथमार्गं तु पक्षवानिव पर्वत ।

[G (ed) om l 1 —(l 1) B3 सोऽथ (for तत्र) B3 तां च जानकीं (for जनकात्मजाम्) —(l 3) V1 क्रोधेन (for वेगेन) —(l 4) V1 च (for तु) —(l 6) Ñ2 B3 D5 7 संरुध्य (for स रुद्ध्वा) B1 पक्षिराडिव (for पक्षवानिव)]

—c) Ś1 D2 वन प्रति (for वनस्पति-) —d) V1 आजुहाव (for व्याजहार) V1 B3 (m also शिवा गिर) शुभा गिर

3 Ñ1 transp ab and cd —a) D5 [आ]स्थितो (for स्थितो) D2 वर्मे (for धर्मे) —b) D1 शूराणा (for पुराणे) Ś1 -सत्त्व, Ñ1 -सस्थित, B1 3 Dt1 D1-3 6 G2 Ch t -सश्रव, B4 -शये, M3 -सगर, Cr m g as in text (for सश्रय) —After 3ab, Dt1 D6 ins :

941* भ्रातस्त्व निन्दित कर्म कर्तुं नार्हसि साप्रतम् ।

—d) M3 महाबल

4 After 4ab, Ñ2 V1 B1 3 4 D5 7 ins

942* त्वं च राक्षसवशस्य प्रवर सुमहाबल ।
विबुधाश्च त्वया राजन्बहुशो निर्जिता रणे ।
मम वृद्धस्य पौलस्त्य बलहीनस्य पक्षिण ।
विक्रम द्रक्ष्यसे युद्धे जीवश्चैव न यास्यसि ।

[(l 1) Ñ2 स (for सु-) —(l 3) V1 गृध्रस्य (for वृद्धस्य)]

—After 4, D3 reads 23ab

5 a) D3 तस्येव (for °षा) —Dg1 reads 5d in marg —d) M3 त्व तां (for या त्व) Dg1 संहर्तुम् (for हर्तुमिह) Ñ2 V1 B1 3 4 D5 7 [उ]द्यत (for [इ]च्छसि)

6 a) T2 तथा (for कथ) Ś1 स्थिते (for स्थितो) —b) Ñ2 D5 7 प्रधर्षयेत्, D4 परामृशन् (for °मृशेत्).

न तत्समाचरेद्धीरो यत्परोऽस्य विगर्हयेत् ।
यथात्मनस्तथान्येषां दारा रक्ष्या विमर्शनात् ॥ ७
अर्थं वा यदि वा कामं शिष्टाः शास्त्रेष्वनागतम् ।
व्यवस्यन्त्यनु राजानं धर्मं पौलस्त्यनन्दन ॥ ८
राजा धर्मश्च कामश्च द्रव्याणां चोत्तमो निधिः ।
धर्मः शुभं वा पापं वा राजमूलं प्रवर्तते ॥ ९ G 3 56 19 B 3 50 10 L 3 55 11

—[c]) D3 प्रयत्नेन (for विशेषेण) —[d]) Ś1 D1 पर-, G3 राम- (for राज-) G3 damaged from दारा up to नीचा in [e] Ś1 D1 2 महायश, Ñ1 D3 महात्मना, Ñ2 V1 B1 3 4 D5 7 मही(D5 °हा)भुजा(Ñ2 B1 3 °जा), G(ed) महीभृता —After 6[cd], D1 (MS states that this is a Kṣepaka) ins

943* कुले वा शौर्ये वा भुज *.. समयेनसि वा
न भूतस्त्वत्तुल्यो क्षितितलतले वीर सुभग ।
अहो धिग्मोहस्ते विरम विरमैतस्य वनिता
न वीराणा पन्था दशवदन येनासि चलित ।

—[e]) G1 गति, M3 रति, Cg as in text (for मति) V1 B1 3 4 नीच (for नीचा) —[f]) Ś1 D2 3 -[अ]भिमर्षिणीं, Ñ2 V1 B1 3 4 D5 7 [अ]भिमर्षणात् —After 6, Ś1 D2 ins

944* मया साम्ना प्रोच्यमानो यदि सीता न लप्स्यसि ।

—After 6, Ś1 Ñ V1 B4 D1-3 5 7 read 27[ef] (Ś1 D2 preceded by 944*)

7 [a]) Ñ2 V1 B1 3 4 D5 7 समाचरेन्न तत् (by transp), D3 न तत्समाश्रयेद् (for न तत्समाचरेद्) Ś1 V1 Dg1 Dm1 D1-3 6 T2 3 G2 M वीरो(Ś1 D2 °र), Cg as in text (for धीरो) —[b]) Ś1 D1-3 तु (for ऽस्य) Ñ2 V1 B1 3 4 D5 7 यत्परेषा(V1 परेषा यद् [by transp]) विगर्हित, D4 8 G1 3 यत्परेण विगर्हित, M3 यत्परैस्तु विगर्हित —[c]) D3 [आ]त्मनि (for °नस्) —[d]) Ñ2 V1 B1 3 4 D3-5 7 T3 G1 2 रक्ष्या दारा (by transp) Ś1 D1 2 M3 विशेषत, Ñ1 हि नित्यदा, Ñ2 V1 B1 3 D3 5 7 विमृश्यता, B4 Dg1 Cg विपश्चिता, D4 T1 2 G1 2 विमर्शता, M2 विदर्शता, Cm k t as in text (for विमर्शनात्) —After 7, Ś1 D1-3 ins

945* आत्मानमुपमा कृत्वा स्वेषु दारेषु रम्यताम् ।,

while Dg1 (m) ins

946* धीरो हि धीमान्तत्कर्म मनसा न समाचरेत् ।

—After 7, Ś1 Ñ V1 B1 3 4 D1-3(Ś1 D1-3 after 945*) 5 7 T2 G2 3(missing partially for 11[ab]) M2 3 read 11

8 [a]) Ñ1 D5 अथ, T3 अर्थो, Ct as in text (for अर्थं) T3 काम (for °म) Dg1 Dm1 D8 T1 2 Cmp धर्ममर्थं च काम च —G3 damaged from शिष्टा in [b] up to व्यव in [c] —[b]) Ś1 B1 3 4 D2 3 5 7 नष्ट, Ñ2 दिष्ट, D1 दृष्ट, T3 निष्ठ, G(ed) नय- (for शिष्टा). B4 Dg1 वा गत, D1 8 [अ]नामतं, T3 [अ]नामय, Cm g t as in text (for [अ]नागतम्) V1 नष्ट शास्त्रेषु गत (subm) —[c]) Dg1 व्यवस्यति न, T3 निवसत्यनु (for व्यवस्यन्त्यनु) Ś1 व्यवस्यति वरात्मानो, Ñ1 D2 3 व्यवस्यंति न(D2 °सति च) राजानो, Ñ2 D5 7 न व्यवस्येन्नर पाप, V1 B1 3 4 व्यवस्येन्न नर पाप(B1 °प), Dm1 D8 T2 G3 Cmp g t न व्य(G3 damaged for न व्य)वस्यति राजानो, D1 G1 व्यवसत्यनु (G1 °ति न) राजानो —[d]) Ñ2 V1 B1 3 4 D5 7 धर्मा(Ñ2 B1 °र्म्या)त्, Dm1 D1 3 8 G3 M1 3 धर्म्यं, T3 Cmp धर्मं, Cg t as in text (for धर्मं) Ś1 D2 धर्मंत (for -नन्दन) T1 2 पौलस्त्यकुलनदन ❀ Cm धर्ममर्थं च काम चेति। शास्त्रेष्वनागतमनवगत रहस्यरूपतया शास्त्रपर्यालोचनेऽपि असूक्ष्मदृष्टीना दुर्बोधनमित्यर्थ । धर्ममर्थं च काम च शिष्टा राज्ञोऽन्ये जना राजानमनु राजानमनुसृत्य व्यवस्यन्ति कुर्वन्ति। राज्ञ मोक्षधर्मादिज्ञानसपत्त्या तादृश राजानमनुसृत्य भूपोपदिष्टधर्मादिक शास्त्रे सम्यगस्फुटमपि प्रजा आचरन्तीति भाव । तस्माद्धर्मोपदेशपरस्य राज्ञस्त्वधर्मप्रवृत्तिरनुचितेति तात्पर्यम् । उपसहरति धर्म इति। हे पौलस्त्यनन्दन तस्माद्धर्म समाश्रयणीय इत्यपेक्षितपदाध्याहारेण योजना। "धर्ममर्थं च काम च शिष्टा शास्त्रेष्वनागतम्। व्यवस्यन्त्यनु राजान धर्म पौलस्त्यनन्दन॥" इति पाठ । "धर्ममर्थं च काम च शिष्टा शास्त्रेष्वनागतम्। न व्यवस्यन्ति राजानो धर्मं पौलस्त्यनन्दन।" इति पाठे त्वयमर्थ —शिष्टा सद्वृत्तयो राजान शास्त्रेष्वनागतमप्रतिपादितमित्यर्थ । न व्यवस्यन्ति नेच्छन्तीत्यर्थ । तस्माद्धर्म समाश्रयणीय इति योजना।, Ct 'न व्यवस्यन्ति राजान' इति पाठे शास्त्रेष्वनागत तत्राप्रतिपादित धर्मं राजानो न व्यवस्यन्ति नेच्छन्तीत्यर्थ ❀

9 [a]) G1 लोकश् (for कामश्) Ś1 Ñ2 V1 B1 3 4 Dg1 D1-3 5 7 T3 M2 Cm राजा(Ñ2 °ज) धर्मस्य कामस्य ❀ Cm "राजा धर्मश्च कामश्च" इति पाठे अयमर्थ —राजैव द्रव्याणामर्थरूपपुरुषार्थस्य निधि स्थान यत अत राजा धर्मश्च कामश्च भवति। कुत धर्म इति। धर्मादिक हि राजमूल प्रवर्तते अतो राजा धर्मश्च कामश्च भवतीति योजना।, Ct "तथा धर्मश्च कामश्च" इति पाठे प्रजानामिति राजेति च शेष । द्रव्याणामिति प्राग्वदेव। यतो धनादिक राजभूतमतो राजा प्रजाना धर्मादिरूप इत्यर्थ ❀ —[b]) D2 धर्माणा (for द्रव्याणा) Ñ1 Dm1 D8 G3 उत्तमो (for चो°) Ñ1 V1 M1 विधि (for निधि) —[c]) Ś1 D2 G2 M1 धर्मं, Ñ1 लोके, D6 धर्मे, G3 damaged, Cm as in text (for धर्म) Dm1 D8 कामो, G3 काम (for पाप) B1 धर्मं शुभ वाप्यशुभ —G3 missing from ल in 9[d] up to कथ in 10[b] on a damaged fol —[d]) Ñ2 V1 B1 3 4 D4 5 7 T2 3 G2 M मूलात् (for -मूल)

G. 3. 56 20
B. 3. 50 11
L 3 55 12

पापस्वभावश्चपलः कथं त्वं रक्षसां वर ।
ऐश्वर्यमभिसंप्राप्तो विमानमिव दुष्कृती ॥ १०
कामस्वभावो यो यस्य न स शक्यः प्रमार्जितुम् ।
न हि दुष्टात्मनामार्य मा वसत्यालये चिरम् ॥ ११
विषये वा पुरे वा ते यदा रामो महाबलः ।
नापराध्यति धर्मात्मा कथं तस्यापराध्यसि ॥ १२
यदि शूर्पणखाहेतोर्जनस्थानगतः खरः ।
अतिवृत्तो हतः पूर्वं रामेणाक्लिष्टकर्मणा ॥ १३

अत्र ब्रूहि यथासत्यं को रामस्य व्यतिक्रमः ।
यस्य त्वं लोकनाथस्य हृत्वा भार्यां गमिष्यसि ॥ १४
क्षिप्रं विसृज वैदेहीं मा त्वा घोरेण चक्षुषा ।
दहेद्दहनभूतेन वृत्रमिन्द्राशनिर्यथा ॥ १५
सर्पमाशीविषं बद्ध्वा वस्त्रान्ते नावबुध्यसे ।
ग्रीवायां प्रतिमुक्तं च कालपाशं न पश्यसि ॥ १६
स भारः सौम्य भर्तव्यो यो नरं नावसादयेत् ।
तदन्नमुपभोक्तव्यं जीर्यते यदनामयम् ॥ १७

---

10 G3 missing up to कथ in 10^{b} (cf v l 9) —^{a}) T2 रामश्च भावश (sic) (for पापस्वभा°) —^{b}) V1 om त्व (subm.) Ś1 V1 B1 3 4 राक्षसाधम (V1 °म), Ñ D5 7 राक्षसाधिप, Dg1 D3 G2 रक्षसा वर —^{cd}) B1 3.4 D5 7 T2 अपि, T1 इह (for अभि-) V1 -सप्राप्ते —G3 missing from च in 10^{d} up to 11^{b} on a damaged fol V1 दु कृती, Dg1 T3 G2 M2 Cm g दुष्कृति , Cv t as in text (for दुष्कृती) Ś1 D1–3 तस्मान्नार्हसि सप्राप्तुमिमा सीता यशस्विनी ❀ Cv काम स्वभाव इत्यादिश्लोको विमानमिव दुष्कृती इत्यत पर द्रष्टव्य'। पूर्वत्र तु प्रमादाल्लिखित ❀ —After 10, M2 (*inf lin sec m*) ins

947* कथ दुष्टात्मनस्तेऽद्य निवसन्त्यालये जना ।

11 Ś1 Ñ V1 B1 3 4 D1–3 (Ś1 D1–3 after 945*) 5.7 T2 G2 3 (missing partially for 11^{ab}) M2 3 read 11 after 7 —^{a}) Ś1 Ñ2 V1 B1 3 4 Dg1 D1 5 7 G1 M1 Cv g काम, Cm t as in text (for काम-) Dt1 D4 6 य (Dt1 om subm) सोसौ (for यो यस्य) —^{b}) V1 om स (subm) Dg1 स न शक्य (by transp), Dt1 D6 Ck t न शक्यस्त (D6 °श्च) (for न स शक्य) Dm1 D8 न शक्य परिमार्जितु, D3 T1 2 Cm न शक्य परिमा (T1 °व)र्जितु —^{c}) Ś1 Ñ B1 3 4 D1–3 5 7 T1 G1 M2 आर्या, Ct आर्ये, (for आर्य) T2 न हि दुष्टात्मना वीर्याद् —^{d}) Ś1 Ñ V1 B1 3 4 D1–3 5 7 M2 निवस (Ñ1 V1 B4 D3 °स)ति, T2 आवसति (for मा वसति) M1 [आ]लय भृश.

12 G3 missing from विषये up to च in ^{b} on a damaged fol —^{a}) D3 सुपुरे (hypm) (for पुरे) Ś1 Ñ V1 B1 3 4 D1–3 5 7 [अ]पि (for ते) —^{b}) Ś1 D1.2 तत्र, V1 यथा, Dg1 D3 T2 3 G1 2 M Cr यदि, Ck t as in text (for यदा) Ñ V1 B1 3 4 D5 7 तदा (B1 3 °दा)नघ' (for महाबल) —^{d}) D5 7 त्वम् (for तस्य) B1 [अ]पराध्यसे

13 G3 missing from तोर् in ^{a} up to ष्टक in ^{d} on a damaged fol —^{b}) D3 जनस्थान —^{c}) Ś1 अनिवृत्तो, D3 सदुर्वृत्तो, D7 अतिवृत्ति- (for अतिवृत्तो) Ñ2 V1 D6 पाप, B1 3 4 D7 पाप (for पूर्वं) —^{d}) M2 [अ]श्रष्ट- (for [अ]क्लिष्ट-) Ñ2 V1 B1 3 4 D5 7 को दोषो राघवस्य तु —After 13, Ñ2 V1 B1 3 4 D5 7 ins.

948* चतुर्दश सहस्राणि राक्षसाना यदा ययु'।
रामलक्ष्मणघाताय रावणेण च ते हता ।

[(1 2) B1 -नाशाय (for घाताय) Ñ2 D5 7 तु (for च)]

14 ^{a}) B1 3 अनु-, Dm1 D8 G3 तत्र (for अत्र) B4 -सत्त्व, Dt1 D6 T1 2 तत्त्व (for -सत्य) —G3 damaged from रा in ^{b} up to हृ in ^{d} —^{b}) Ś1 नामास्य (for रामस्य) —^{d}) T1 2 transp हृत्वा and भार्यां Ś1 Ñ1 D1–3 भार्यां हर्तुमिहेच्छसि, Ñ2 V1 B1 3 4 D5 7 भार्यां हर्तुमिहोद्यत

15 ^{b}) Ś1 Ñ2 V1 B1 3 4 D2 3 5 7 8 Cm मा (B4 या, D3 सा) त्वा, Dg1 Dm1 (after corr *sec. m* मा त्वा) G1 मा त्व, D1 महा-, D6 T3 मत्वा, Cr k t as in text (for मा त्वा) G3 damaged for ण चक्षुपा —^{c}) Dg1 दहे दहन- (sic), G1 दहेर्दाहन- (for दहेद्दहन-) Dt1 -मूर्तेन, Dm1 D8 T2 M2 3 -कल्पेन, Cm as in text (for -भूतेन) —^{d}) Ś1 Ñ1 D1–3 वृक्षम् (for वृत्रम्)

16 ^{a}) Ñ1 कथम्, T2 स त्वम् (for सर्पम्) Ś1 D2 बद्ध (for बद्ध्वा) —Ñ1 om 16^{cd} G3 partially damaged for 16^{cd} —^{c}) Ś1 D2 -सयुक्त, D1 3 -ससक्त, T1 2 सक्त च (for मुक्त च) Ñ2 B1 3 4 D5 7 ग्रीवाया च समाम (B3 4 °यु)क्त, V1 ग्रीवाया च यथा बद्ध —^{d}) V1 B1 3 4 D5 7 बुध्यसे (for पश्यसि)

17 ^{a}) Ñ2 V1 B1.3 4 D5 7 स (B1 4 स्व) भारो (B1 3 4 °वो) मूढ (V1 यदि) हर्तव्यो —G3 partially damaged for 17^{bcd} —^{b}) Ñ1 नावपीडयेत् (for °सादयेत्). —For 17^{ab}, Ś1 D1–3 subst

949* भार सम्यक्स वोढव्यो यो भारो न विषादयेत् ।

[Ś1 सत्यस्य, D1 सम्यग्यो, D2 स सम्यक् (by transp) (for सम्यक्स) Ś1 D2 हर्तव्यो (for वोढव्यो) Ś1 भारो यो (by transp)]

—After 17^{ab}, Ñ2 V1 B1 3 4 D5 7 ins

950* न रत्न प्रतिबोढव्य यद्बल क्षयमावहेत् ।

यत्कृत्वा न भवेद्धर्मो न कीर्तिर्न यशो भुवि ।
शरीरस्य भवेत्खेदः कस्तत्कर्म समाचरेत् ॥ १८
षष्टिर्वर्षसहस्राणि मम जातस्य रावण ।
पितृपैतामहं राज्यं यथावदनुतिष्ठतः ॥ १९
वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी ।
तथाप्यादाय वैदेहीं कुशली न गमिष्यसि ॥ २०
न शक्तस्त्वं बलाद्धर्तुं वैदेहीं मम पश्यतः ।
हेतुभिर्न्यायसंयुक्तैर्ध्रुवां वेदश्रुतीमिव ॥ २१
युद्धयस्व यदि शूरोऽसि मुहूर्तं तिष्ठ रावण ।
शयिष्यसे हतो भूमौ यथा पूर्वं खरस्तथा ॥ २२
असकृत्संयुगे येन निहता दैत्यदानवाः ।
नचिराच्चीरवासास्त्वां रामो युधि वधिष्यति ॥ २३
किं नु शक्यं मया कर्तुं गतौ दूरं नृपात्मजौ ।
क्षिप्रं त्वं नश्यसे नीच तयोर्भीतो न संशयः ॥ २४

G 3 56. 0
B 3 50 25
L 3 55 25

[Ñ2 D5 7 न च तत्, B4 नद्रत (for न रत्न) B1 3 यदर्थं (for यद्रत्न) B4 जयम् (for क्षयम्) B3 आचरेत् (for आवहेत्)]

—^{c}) Dt1 Dm1 D4 6 8 T G1 M अपि, Dg1 अभि- (for उप) —^{d}) V1 B4 जीर्यंत (for जीर्यंते)

18 ^{a}) Ñ1 न नून हि (for यत्कृत्वा न) B3 चरेद् (for भवेद्) —^{b}) Dt1 D6 ध्रुव (for भुवि) Ñ2 V1 B1 3 4 D5 7 यत्कृत्वा न भवेद्यश —G3 damaged for 18^{cd} —^{c}) Ś1 D2 शरीरतो भवेद्धर्म (L[ed]°त्कर्म), Ñ1 शरीरसादश्च भवेत्, Ñ2 V1 B1 3 4 D1 3 5 7 शरीरदोष(D1 3 °रोध)श्च भवेन् —^{d}) V1 B1 3 4 D5 7 न (for कस्) D3 प्राज्ञ (for कर्म) Ś1 D1 2 कथ प्राज्ञ स(Ś1 °ज्ञस्त)मा(L[ed]°ज्ञस्तदा)-चरेत्

19 ^{a}) Ś1 Ñ2 V1 D5 7 षष्टि (sic), Dm1 D2–4 6 T1 2 G1 M2 3 Cm षष्टिर्, Ct as in text (for षष्टि-) —^{b}) Dt1 Dm1 D6 8 जातस्य मम (by transp), M3 तव जातस्य (for मम जातस्य) —Ñ1 om 19^{cd} —^{c}) Ś1 पितृपैतामहे राज्ये —G3 missing from यथा in ^{d} up to युवा in 20^{a} on a damaged fol —^{d}) Ñ2 V1 B1 4 D5 7 -शासत, B3 शास्याह (sic), Cg as in text (for तिष्ठत) Dg1 T3 दडकारण्यमेव न —After 19, Ś1 D1–3 ins

951* न श्रुत न च मे दृष्ट परदाराभिमर्शनम् ।

[D1 मया (for च मे)]

20 G3 missing up to युवा in ^{a} (cf v l 19) —^{a}) V1 B1 वीरो, B3 4 D5 7 वीर (for धन्वी) —^{b}) Ś1 Ñ V1 B1 3 4 D1–3 5 7 रथस्थ, T1 G2 सशर (for सरथ) T1 G2 रथी (for शरी) —^{c}) Ñ2 Dt1 D4 6 T3 G1 2 M Ct न चापि, V1 B1 3 4 D5 7 न चाद्य(B3 °भि-), Dg1 न च हि (for तथापि) Ś1 D1–3 अ(D3 ना)संत्यज्येह, Ñ1 नैवादाय च Dt1 D6 Ct कुशली, M1 मे देवी (for वैदेहीं) —G3 missing from मिष्यसि in ^{d} up to वै in 21^{b} on a damaged fol —^{d}) B1 कुशल, Dt1 D6 Ct वैदेहीं, M1 कुशलो (for कुशली) Ś1 Ñ V1 B1 3 4 D1–3 5 7 त्व, Dg1 Dt1 D4 6 T3 G1 2 M Ct मे, Dm1 D8(after corr as in text) G3 मा (for न) Ś1 D2 न यास्यसि (for गमिष्यसि)

21 G3 missing up to वै in ^{b} (cf v l 20) —^{a}) Dg1 G2 Cr शक्यस्, Cg as in text (for शक्तस्) Ñ1 न शक्या ते बलान्नेतु —^{b}) Ñ1 वैदेही, D1–3 मैथिलीं (for वैदेहीं) Ñ1 lacuna for पश्यत —^{c}) B1 3 नय- (for न्याय) Ñ2 B1 3 4 D5 7 -सबद्धै, V1 D4 M2 Cr g k -ससिद्धै, Cm t as in text (for सयुक्तैर्) Ñ1 हेतुभिर्वान्यससिद्धैर् —^{d}) Ś1 मूढो, Ñ1 ध्रुवं, Ñ2 V1 B1 3 4 D1–3 5 7 शूद्रो, D6 ध्रुवो (for ध्रुवा) G1 वेदश्रुति यथा ❀ Cr दीर्घ आर्ष ।, Cm श्रुतीमित्यत्र दीर्घश्छान्दस ।, Cg वेदश्रुतीमिव वेदश्रुतिमिव । दीर्घ आर्ष ।, Ck t वेदश्रुतिम् । छान्दसो दीर्घ ❀ —After 21, Ñ2 V1 ins, while T2 ins after 27

952* इत्युक्तस्य यथान्याय रावणस्य जटायुषा ।
क्रुद्धस्याग्निनिभा घोरा विरेजुर्विंशतिर्दृश ।

[(l 2) T2 सव (for घोरा) T2 रेजुर्विंशतिदृष्टय (for the post half)]

22 Ñ2 V1 B4 D5 7 om (hapl) 22–27^{b}, B1 3 om 22–27 Ñ1 reads 22 after 27^{cd} —^{a}) Ś1 Ñ1 D1–3 वीरोसि (for शू°) —^{b}) Ñ1 मुहूर्तं त्व मया सह —G3 damaged from मौ up to स्तथा in ^{d} —^{c}) Dg1 Dm1 D1–3 8 G3 शयिष्यसि(D2 °ते), Cr g k शयिष्यसे (as in text).—^{d}) Ś1 D1–3 भ्राता, Ñ1 वासौ (for पूर्वं) Ś1 D3 तव (for तथा)

23 Ñ2 V1 B1 3 4 D5 7 om 23 (cf v l 22) Ñ1 om 23 D3 reads 23^{ab} after 4 —^{b}) M1 देव- (for दैत्य-) —^{c}) D4 M1 2 अचिराच् (for नचिराच्) —G3 missing from युधि in 23^{d} up to म in 24^{a} on a damaged fol —^{d}) Ś1 यदि, Dg1 युद्धे (for युधि) M1 transp रामो and युधि

24 Ñ2 V1 B1 3 4 D5 7 om 24 (cf v l 22) G3 missing up to म in ^{a} (cf v l 23) —^{a}) Ś1 D2 8 तु (for नु) M3 मृषा (for मया) T1 3 [आ]हर्तुं (for कर्तुं) D3 transp शक्य and कर्तुं —^{b}) D1 दूरौ (for दूर) —^{c}) Ñ1 D3 G1 च नश्यसे, D2 न पश्यसे (for त्व नश्यसे) D1 क्षिप्र नश्यसि नीचस्त्व —^{d}) Ś1 D2 4 भ्रात्रोर् (for भीतो)

G 3 56 0
B 3 50 26
L 3 55 26

न हि मे जीवमानस्य नयिष्यसि शुभामिमाम् ।
सीतां कमलपत्राक्षीं रामस्य महिषीं प्रियाम् ॥ २५
अवश्यं तु मया कार्यं प्रियं तस्य महात्मनः ।
जीवितेनापि रामस्य तथा दशरथस्य च ॥ २६
तिष्ठ तिष्ठ दशग्रीव मुहूर्तं पश्य रावण ।
युद्धातिथ्यं प्रदास्यामि यथाप्राणं निशाचर ।
वृन्तादिव फलं त्वां तु पातयेयं रथोत्तमात् ॥ २७

इति श्रीरामायणे अरण्यकाण्डे अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

25 Ñ2 V1 B1 3 4 D5 7 om 25 (cf v l 22) Ñ1 om 25–26 —^{a}) Dm1 D8 G3 मे त्व (for हि मे) —^{b}) Ś1 D1–3 निशाचर, G2 शुभानना (for शुभामिमाम्) —After 25, M3 ins

953* वृद्धो गतवयश्चाहं तरुणस्त्वं च रावण ।

26 Ñ V1 B1 3 4 D5 7 om 26 (cf v l 22 and 25) —^{a}) G3 प्रिय तस्य (for मया कार्यं) —^{b}) G3 करिष्यामि (for प्रिय तस्य) —^{c}) D3 [अ]स्य (for [अ]पि)

27 Ñ2 V1 B4 D5 7 om 27^{ab}, B1 3 om 27 (for all cf v l 22) —^{b}) Dg1 तिष्ठ (for पश्य) Ś1 D1–3 मे बल, Ñ1 चैव मा (for रावण) —Dg1 Dt1 Dm1 D6 8 T3 G3 Cg transp ^{cd} and ^{ef} —^{c}) Ś1 यथातिथ्य (for युद्धा°) —^{d}) D1 बल (for प्राण) G1 M1 न संशय (for निशाचर) Ñ1 तवाहं राक्षसाधम —After 27^{cd}, Ś1 D1–3 ins

954* सीतां संत्याजयिष्यामि स्थिरो भव सुदुर्मते ।

—After 27^{cd}, Ñ1 reads 22, while M2 (*inf lin sec m*) ins

955* मम तीक्ष्णेन तुण्डेन ग्रीवास्ते शिरसा दश ।

—Ś1 Ñ V1 B4 D1–3 5 7 read 27^{ef} (Ś1 D2 preceded by 944*) after 6 —^{e}) Ś1 D1 2 पक्क, Ñ1 मा त्वा, D3 माला (sic) (for त्वा तु) Ñ2 B4 D5 7 मा त्वा वृक्षादिव फल, V1 स त्वा वृतादिव फल —^{f}) Ś1 D1 2 पातयामि, Ñ V1 B4 D5 7 °यिष्ये (for °येय) Ñ1 D3 नभस्तलात् (for रथोत्तमात्) —After 27, T2 ins 952*

Colophon Ñ2 V1 B1 4 D5 7 om —*Sarga name* Ś1 Ñ1 D3 जटायुवाक्य, D1 गृध्रवाक्य, D2 सीताप्रमाथे जटायुवाक्य —*Sarga no* (figures, words or both) Ś1 Ñ1 B3 D2 om, Dg1 Dt1 Dm1 D6 8 T G M1 2 50, D1 4 52, D3 56, M3 51, L(ed) 55 —After colophon, G concludes with श्रीरामाय नम

४९

इत्युक्तस्य यथान्यायं रावणस्य जटायुषा ।
क्रुद्धस्याग्निनिभाः सर्वा रेजुर्विंशतिदृष्टयः ॥ १
संरक्तनयनः कोपात्तप्तकाञ्चनकुण्डलः ।
राक्षसेन्द्रोऽभिदुद्राव पतगेन्द्रममर्षणः ॥ २
स संप्रहारस्तुमुलस्तयोस्तस्मिन्महावने ।
बभूव वातोद्धतयोर्मेघयोर्गगने यथा ॥ ३
तद्बभूवाद्भुतं युद्धं गृध्रराक्षसयोस्तदा ।
सपक्षयोर्माल्यवतोर्महापर्वतयोरिव ॥ ४
ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः ।
अभ्यवर्षन्महाघोरैर्गृध्रराजं महाबलः ॥ ५
स तानि शरजालानि गृध्रः पत्ररथेश्वरः ।
जटायुः प्रतिजग्राह रावणास्त्राणि संयुगे ॥ ६
तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः ।
चकार बहुधा गात्रे व्रणान्पतगसत्तमः ॥ ७
अथ क्रोधाद्दशग्रीवो जग्राह दश मार्गणान् ।
मृत्युदण्डनिभान्घोराञ्शत्रुमर्दनकाङ्क्षया ॥ ८

G 3 56 0
B 3 51 7
L 3 56 8

49

V2 illeg for Sarga 49 (cf v l 3 46 7) Ñ2 V1 B1 3 4 D5 7 continue the previous Sarga M1 begins with श्रीरामाय नम

1 Ñ2 V1 Dg1 D6 T M om 1 —a) D3 इत्युक्त्वास्य (for इत्युक्तस्य) —b) D3 गतायुष (for जटायुषा) —c) Ś1 Ñ1 D1–3 G1 2 सख्ये, B1 3 4 D5 7 घोरा, D8 G3 सर्वे (for सर्वा) —d) D1 द्विर्दश- (for विंशति-) Ś1 D3 विरेजु शरवृष्टय , Ñ1 D2 विरेजुर्दश दृष्टय , B1 3 4 D5 7 विरेजुर्विंशति-र्दश (B4 °शा)

2 Ś1 om 2ab —a) Ñ V1 B1 3 4 D1–3 5 7 श्रीमास्, Dm1 D8 G2 3 क्रोधात् (for कोपात्) Dg1 Dt1 D6 T M इत्युक्त क्रोधताम्राक्षस् —b) D1–4 -भूषण (for -कुण्डल) —c) V1 D3 विदुद्राव, B4 G2 [s]पि दुद्राव (for ऽभिदुद्राव) —d) Ś1 Dm1 D1 2 अमर्षण, G1 M1 2 अमर्षित , Cg as in text (for अमर्षण)

3 —a) Dt1 सत्य प्रहारस् (for स स°) —b) Ś1 Dg1 Dt1 Dm1 D6 8 T3 G3 M3 महामृधे, Ñ2 D3 7 महाहवे, V1 B3 °बले, B1 °रणे (for महावने) —c) Ñ B1 3 4 Dt1 D1–3 6 G Ct वातोद्धुतयोर्, Cg as in text (for वातोद्धतयोर्) D5 बभूवातो युद्ध तयोर् —d) G3 घोरयोर् (for मेघयोर्) Ñ2 V1 B1 3 4 D3 5 7 G1 2 गगने मेघयोरिव (D3 G1 2 °र्यथा) —After 3, Ñ2 V1 B1 3 4 D5 7 ins

956* तुण्डपक्षप्रहरणो जटायुश्चरणाङ्कुश ।
रावणश्च महावीर्यो युयुधाते परस्परम् ।

[(l 1) B1 4 प्रहारेण (for प्रहरणो) B3 चरणायुध]

4 a) Ñ2 D5 7 महद्युद्ध (for [अ]द्भुत युद्ध) —b) Ñ1 तयो , Ñ2 D5 7 अथ, V1 B1 3 4 महत्, Dm1 तथा, D1–3 मृधे, G2 वने (for तदा) D6 om (hapl) from क्षस योस्तदा in 4b up to गृध्ररा in 5d M3 गृध्रराक्षसराजयो —cd) Ñ2 V1 B1 3 4 D5 7 भृश तत्र (for माल्यवतोर्) V1 B1 3 4 मेघ- (for महा-) G(ed) शब्दस्तयोर्भृश तत्र गगने मेघयोरिव

5 D6 om up to गृध्ररा in d (cf v l 4) —a) Ñ2 नारीक-, V1 नाडीक- (for नालीक-) —b) B1 शूलाकर्ण , B4 D5 7 तीक्ष्णैश्चापि (for तीक्ष्णाग्रैश्च) —c) V1 अभिवर्षन् (for अभ्य°) Ñ2 D5 7 महावेगैर्, G2 महाघोर (for महाघोरैर्) —d) Ś1 Dm1 D2 3 6 महाबल, Ñ2 V1 B1 3 4 D5 7 शरोर्मिभि (for महाबल) Dt1 गृध्रराजमहाबल

6 a) Ś1 शितानि, Ñ1 Dg1 G2 शतानि, Dm1 एतानि (for स तानि) —b) Ñ2 D7 गृध्र (for गृध्र) —d) Cr g k t रावणास्त्राणि (as in text) D3 रावणस्याभि सयुगे ❀ Ct 'रावणास्तानि' इति पाठस्तु सुगम एव ❀ —After 6, Ñ2 V1 B1 3 4 D5 7 ins

957* तत स क्रोधसरब्धो विकीर्ण इव पर्वत ।
पृष्ठेऽस्य न्यपतद्गृध्रो नखैश्च विचकर्त स ।

[(l 1) Ñ2 B1 4 क्रोधसरक्तो, B3 °सवद्धो (for °सरब्धो) —(l 2) Ñ2 B4 D7 भूयो, D5 भूमो (for गृध्रो) Ñ2 D7 विचकर्ष त (for विचकर्त स) D5 नखैश्चापि चकर्ष त]

7 a) Ñ1 -नखाग्राभ्या, T2 3 M1 -नखैर्वीरैश् (for नखाभ्या तु) Dg1 M3 तस्य तीक्ष्णैर्नखैर्वीरैश् —b) D1 रावणस्य, M3 तुडाभ्या च (for चरणाभ्या) —c) Ñ1 बहुशो (for बहुधा) Ñ2 D5 7 चक्रे सरुधिर गात्र, V1 B1 3 4 चक्रे सरुधिरान्गात्रे —d) Ś1 पतगनायक , Dm1 D8 G3 विहग-नायक , T3 °पुगव (for पतगसत्तम) Ñ2 V1 B3 4 D5 7 क्षणात्प(V1 B3 4 व्रणान्प)त्ररथेश्वर , B1 व्रणाश्च पतगेश्वर , D1 व्रणानि खगसत्तम —After 7, V1 ins 962* (due to omission), B4 reads 959* for the first time after 7 and repeats it after 958*

8 V1 om 8–10 B1 3 om 8 The sequence of St from 8–14 including star passages in B4 is 10cd, l 1–2 of 965*, 9cd, l 3–4 of 958* (8 subst), 959* (r), 10ab, l 3–4 of 965*, 13, 14, 962*, 11, 12 and 968* —a) Ñ1 क्रुद्धो (for क्रोधाद्) —c) Ś1

G 3 56 41
B 3 51 8
L 3 56 9

स तैर्बाणैर्महावीर्यः पूर्णमुक्तैरजिह्मगैः ।
बिभेद निशितैस्तीक्ष्णैर्गृध्रं घोरैः शिलीमुखैः ॥ ९
स राक्षसरथे पश्यञ्जानकीं बाष्पलोचनाम् ।
अचिन्तयित्वा बाणांस्तान्राक्षसं समभिद्रवत् ॥ १०
ततोऽस्य सशरं चापं मुक्तामणिविभूषितम् ।
चरणाभ्यां महातेजा बभञ्ज पतगेश्वरः ॥ ११
तच्चाग्निसदृशं दीप्तं रावणस्य शरावरम् ।
पक्षाभ्यां च महातेजा व्यधुनोत्पतगेश्वरः ॥ १२

D2 3 -दण्डसमान , D1 -दण्डोपमान् (for -दण्डनिभान्) —^{d}) Ś1 D1–3 शत्रुमर्माणि (D1 3 °र्माव, D- °र्मनि) भेदिन , Ñ1 शत्रुदर्पविमर्दवान् , Dt1 Dm1 D6 8 शत्रोर्निर्मनकाक्षया —For 8, Ñ2 D5 7 subst , while B4 subst 1 3–4 only for 8 and reads after 9^{cd}

958* तत स रावण क्रुद्धस्त्रिभिर्बाणैरजिह्मगै ।
विभेद समरे घोरैर्गृध्रराजानमाशुगै ।
अथापरानजिह्माग्राञ्जग्राह रथमार्गणान् ।
मृत्युदण्डोपमान्घोराञ्शत्रुदर्पप्रणाशनान् ।

[(l 3) B4 दशग्रीवो (for अजिह्माग्रान्) B4 दश जग्राह ताञ्शरान् (for the post half) —(l 4) B4 कालपाशनि भाञ्शरान् (for the post half)]

9 V1 om 9 (cf v l 8) For sequence in B1, cf v l 8 —^{a}) Ñ2 शितैर् , Dg1 Dt1 D7 शतर् , D3 सर्वैर् (for स तैर्) Dg1 महावीर , D6 °वीर्यं , T2 °र्गैः (for महावीर्यः) —^{b}) Ś1 D1–3 रुक्मपुंखैर् , Ñ1 स्वर्णमुक्तैर् , T1 पूर्णयुक्तैर् (for पूर्णमुक्तैर्) T2 अजिह्मकैः (for अजिह्मगैः) Ñ2 स्वर्णपुंखैर्महाबल —^{c}) Ñ1 जघान (for बिभेद) Ñ2 समरे (for निशितैस्) Ś1 Ñ D1–3 घोरैर् , M2 बाणैर् (for तीक्ष्णैर्) B4 बाणैर्बिभेद तीक्ष्णाग्रैर् —^{d}) Ś1 D1 2 गृध्र तीक्ष्णैः शिलाशितैः , Ñ1 गृध्रराज महाबल , Ñ2 गृध्रराज आशुगैः , B4 D3 गृध्रराज शिलाशितैः —For 9, B1 3 D5 7 subst , Ñ2 ins 1 2 after 9^{ab}, B4 ins first time after 7 and reads second time after 958* as subst for 9^{ab} only

959* स तरशनिसंकाशैः स्वर्णपुङ्खैरजिह्मगैः ।
निर्बिभेद गृध्रपतिमतिक्रुद्धो दशाननः ।

[(l 1) D5 7 स तैर्बाणैर्महावीर्यैः (for the prior half) B4 (second time) तीक्ष्ण- (for स्वर्ण-) D5 7 महाबलः (for अजिह्मगैः) —(l 2) Ñ2 D5 7 सुतीक्ष्णाग्रैः (for गृध्रपतिम्) Ñ2 D5 7 शरीरं तस्य पत्रिणः (for the post half)]

—B1 3 4 (after first occurrence of 959*) cont , while Ñ2 D5 7 ins (followed by 965*) after 12

960* स रावणविमुक्तास्तु शरान्वै पतगेश्वरः ।

—Thereafter, B4 reads 10^{cd}, while M3 ins after 9

961* स रोषमकरोद्गृध्रो रावणेन शराहतः ।

10 Ś1 V1 D1–3 om 10 (for V1, cf v l 8) For sequence in B1, cf v l 8 Ñ2 B1 3 D5 7 om 10^{ab} —^{a}) B4 रावण- (for राक्षस-) Ñ1 पथे (for -रथे) —^{b}) Ñ1 B4 पतगेश्वर (for बाष्पलोचनाम्) —^{c}) Ñ1 वचयित्वा तु (for अचिन्तयित्वा) Ñ Dg1 D1 5 7 T G2 M तान् बाणान् (by transp). B1 2 4 अचिन्तयन्महाबाणान् —^{d}) Ñ B1 3 4 D5 7 रावण (for राक्षसं). Ñ B1 3 4 समुपाद्रवत् (for समभि°) —After 10, Ñ2 B1 2 D1 7 ins , while V1 ins after 7 (due to omission) and B4 ins after 11^{cd}

962* उपेत्य स महाबाहु पक्षावुद्यम्य मूर्धनि ।
पक्षाभ्यामभिसंक्रुद्धस्ताडयामास रावणम् ।

[(l 1) B1 3 4 उत्पत्य च (for उपेत्य स) Ñ2 D5 7 उत्पतन्निपपातैव (for the prior half) —(l 2) V1 B1 अभिसंरब्ध (for अभि°)]

11 For sequence in B1 cf. v l 8 —^{b}) G(ed) मणिमुक्ता (by transp) (for मुक्तामणि-). —Ś1 D1 2 om 11^c–12^b After 11^{ab}, D2 reads 12 —^{c}) Ñ1 पक्षाभ्यां स (for चरणाभ्यां). —^{d}) Dt1 Dm1 D6 8 G2 पतगोत्तम , D2 सुमहाबल (for पतगेश्वर) —After 11, D2 ins , while Ś1 D1 ins after 12 and D3 after 14

963* सारथिं च रथोपस्थात्स्म जघान नखाङ्कुशैः ।,

while Dg1 Dt1 Dm1 D6 8 S ins after 11

964* ततोऽन्यद्धनुरादाय रावण क्रोधमूर्छित ।
ववर्ष शरवर्षाणि दशग्रीवोऽथ सहस्रश ।
शरैरावारितस्तस्य संयुगे पतगेश्वर ।
कुलायमभिसंप्राप्त पक्षीव च बभौ तदा ।
स तानि शरजालानि पक्षाभ्यां तु विधूय ह । [5]
चरणाभ्यां महातेजा बभञ्जास्य महद्धनु ।

[(l 2) G2 राक्षसेश्वर (for क्रोधमूर्छित) —After l 2, D8 reads राम श्री —(l 3) D8 आवरितस्, M1 आच्छादितस् (for आवारितस्) Dg1 T3 नत (for तस्य) —(l 4) D1 T1 2 G1 2 M2 3 उपसंप्राप्त , G3 अपि संप्राप्त , M1 इव संप्राप्त (for अभिसंप्राप्त) Dm1 D6 T2 G M1 स (for च) Dg1 स तथा बभौ, D8 स बभौ तदा, T1 प्रबभौ तदा, T3 स तदा बभौ (for च बभौ तदा) —(l 5) Dg1 Dm1 D8 T G2 3 M शरवर्षाणि (for °जालानि) Dg1 Dm1 D1 8 T G M1 2 च, M3 प्र (for तु) T2 विधून्वन्, G1 [अ]वधूय ह (for विधूय ह) —(l 6) G3 [अ]थ (for [अ]स्य) M2 3 पुनर् (for महद्)]

12 For sequence in B4, cf v l 8 Ś1 D1 2 om 12^{ab} (cf v l 11) D2 transp ^{ab} and ^{cd} and reads after 11^{ab} B3 reads 12^{ab} in marg —^{a}) Ñ2 B3 4 D5 भ(B4 भु)क्त्वा, D2 तथा, M3 त च (for तच्च) Ñ V1 B1 3 4 D2 5 T2 दिव्य (for दीप्त) D7 खडयित्वाग्नि-

काञ्चनोरश्छदान्दिव्यान्पिशाचवदनान्खरान् ।
तांश्चास्य जवसंपन्नाञ्जघान समरे बली ॥ १३

वरं त्रिवेणुसंपन्नं कामगं पावकार्चिषम् ।
मणिहेमविचित्राङ्गं बभञ्ज च महारथम् ।
पूर्णचन्द्रप्रतीकाशं छत्रं च व्यजनैः सह ॥ १४

G 3 56 0
B 3 51 17
L 3 56 12

सदृश दिव्य(hypm) —Ñ1 illeg for 12^{b} —^{b}) Ñ2 V1 B1 3 4 D5 7 8 T2 Ctp शरासन, D2 महारथ, D4 शर वर, Cm g t as in text (for शरावरम्) —^{c}) V1 B1 D1–3 5 7 स (for च) Ñ1 चरणाभ्या (for पक्षाभ्या च) Ś1 B3 सुमहातेजा, Dg1 Dm1 D4 8 T G M1 2 च महावीर्यो (for च महातेजा) B4 पक्षाभ्याममिसरब्धो —^{d}) Ñ2 V1 B1 3 4 D5 7 दुद्राव, Dg1 D4 G2 Cm g k व्याधुनोत्, D2 बभज, Cr t as in text (for व्यधुनोत्) Ś1 D1 बभज स (Ś1 सु) महाबल, D3 बभज पतगोत्तम —After 12, V1 B1 3 ins, while Ñ2 D5 7 cont after 960*, B4 ins l 3–4 after 10^{ab} and l 1–2 after 10^{cd}

965* ततो बहुश आविध्य तत्किरीट महाबल ।
जाम्बूनदमय दिव्य सर्वरत्नोपशोभितम् ।
व्यसर्जयत पक्षीन्द्रो रोषाविष्टो नभस्तले ।
अशोभत पतत्तत्तु सूर्यमण्डलसंनिभम् ।

[(l 3) B4 विससर्ज स (for व्यसर्जयत) V1 नभस्तल (for °स्तले) —(l 4) B1 पतत्तच, B4 पतत्रस (for पतत्तत्तु) B3 अशोभदुत्पतचैव (for the prior half)]

—After 12, Ś1 D1 ins 963*, while B4 ins 968*

13 For sequence in B4, cf v l 8 Ñ1 om 13^{a}–14^{b} D7 om 13 —^{a}) Ñ2 V1 B3 4 D1–3 5 हत्वा, Dg1 Dm1 D8 T3 G3 दीप्तान्, D4 lacuna (for दिव्यान्) Ś1 रुक्मरथच्छदान्हत्वा, B1 काचनावच्छदान्हत्वा —Ś1 D1–3 om. 13^{c}–14^{b} —^{cd}) Dm1 D8 T2 M1 स रणे (for समरे) Ñ2 V1 B1 3 4 D5 विकृष्य तरसा पक्षी क्षिप्र प्राणैर्व्य(V1 °र्वि)योजयत्

14 For sequence in B4, cf v l 8 Ś1 Ñ1 D1–3 om 14^{ab} (cf v l 13) —^{ab}) Dt1 D6 अथ, Cg as in text (for वर) T2 त्रिदड-, M3 त्रिगुण- (for त्रिवेणु) ❀ Cv त्रिगुणसपन्नमिति पाठ ❀ Ñ2 V1 B1 3 4 D5 7 कामग तु(B3 त)महाघोर चक्रकूबरभूषण —Ś1 Ñ1 D1 2 transp ^{cd} and ^{ef} —^{c}) D3 रत्न- (for -हेम-) Dt1 D6 मणिसोपानचित्राग —^{d}) Ś1 बभज स, Dm1 G3 बभजाथ, D1 3 स बभज (for बभञ्ज च) —After 14^{cd}, Ś1 D1–3 ins, Ñ2 V1 B1 3 4 D5 7 ins after 16

966* ततस्तु त परबलमानभञ्जन
सुरासुरै समरमुखेष्वनिर्जितम् ।
पराजित पतगवरेण रावण
निसिस्मिये सुरमुनिभिर्विलोक्य तम् ।
ततोऽस्तुवन्पतगवर दिवौकस
सुदुष्कर कृतमिह कर्म तेऽनघ ।
प्रशस्यते स विहगराजसत्तमो
व्यवस्थित पुनरपि युद्धमर्पित ।

Colophon

कृत्वा तु तन्महत्कर्म जटायुर्जरयान्वित ।
परिश्रान्तो बभूवाथालक्षयत्त च रावण ।

[(l 1) Ś1 D2 च (for तु) D5 om त (subm) B1 -यानभजन (for -मानभ°) —(l 2) B1 मुखे सुपूजित (for मुखेष्वनिर्जितम्) —(l 3) D1 वीक्ष्य त (for रावण) —(l 4) B1 3 4 विसिसिमिरे, D5 विमिसिमिये (for विसिसिमिये) Ś1 D2 विसिसिमियु सुरमुनयोव(Ś1 वि)लोक्य त, D1 3 विसिसिमियु खगचरभूतवनिका (sic) —(l 5) Ś1 अभिष्टुत, D1–3 अभिष्टुवन् (for ततोऽस्तुवन्) D1–3 शुभा गिरा(D1 3 °र) (for दिवौकस) —(l 6) B4 इति (for इह) B1 तेन तत्, B4 तेन यत् (for तेऽनघ) Ś1 D1 2 कर्म कृत त्वयाद्भुत, D3 कर्म इद त्वया कृत (for कृतमिह कर्म तेऽनघ) —(l 7) Ñ2 D5 7 प्रशसित स (for प्रशस्यते स) Ś1 D1–3 प्रश(Ś1 °भा)सितो द्विजवरराजसत्तमैर्(Ś1 D2 °मो) —(l 8) Ś1 D1 2 युद्धनिश्चय (Ś1 D2 °ये), B1 3 युद्धार्पित, B4 °हर्षित, D3 °निभय (for युद्धमर्पित)]

Colophon —*Sarga name* Ś1 Ñ2 V1 B1 3 4 D1 2 5 7 जटायुरावणयुद्ध, D3 रावणविरथीकरण —*Sarga no* Ñ2 B4 D3 57, V1 55, D1 53, D5 7 56

—Ś1 D1–3 om l 9–10 —(l 9) B1 3 सुमहत् (for तन्महत्) —(l 10) V1 परिभ्रातो (for परिश्रातो) Ñ2 D5 7 तु (for च)],

while Ñ1 ins after 14^{cd}

967* पश्यत सारथिवाभ्य . . . . . (illeg)
ततो जघ्नि . . . . (illeg),

whereas after 14^{cd}, Ñ2 V1 B1 3 D5 7 ins, while B4 ins after 12

968* समाक्षिप्य रथात्तस्मात्सारथि पतगेश्वर ।
गजाङ्कुशनिभेनाशु दारयित्वा पदासृजत् ।

[(l 2) V1 परामृशत्, B1 पदाहनत् (for पदासृजत्)]

—Ñ2 V1 B1 3 4 D5 7 om 14^{ef} —^{f}) Dg1 T2 3 G2 M1 3 व्यजनकै (for च व्यजनै) Ś1 Ñ1 D1–3 छत्र तस्य न्यपातयत् —After 14, Dg1 Dt1 Dm1 D4 6 8 S ins

969* पातयामास वेगेन ग्राहिभी राक्षसै सह ।
सारथेश्चास्य वेगेन तुण्डेनैव महच्छिर ।
पुनर्व्यपाहरच्छ्रीमान्पक्षिराजो महाबल ।

[(l 2) Dt1 D6 च, T2 [अ]स्य (for [ए]व) —(l 3) Dt1 D6 व्यपहनच्, T3 व्यपोहयच् (for व्यपाहरच्)]

—After 14, D3 ins. 963*

G 3 56 51 B. 3 51 19 L 3 57 1 स भग्नधन्वा विरथो हताश्वो हतसारथिः ।
अङ्केनादाय वैदेहीं पपात भुवि रावणः ॥ १५
दृष्ट्वा निपतितं भूमौ रावणं भग्नवाहनम् ।
साधु साध्विति भूतानि गृध्रराजमपूजयन् ॥ १६
परिश्रान्तं तु तं दृष्ट्वा जरया पक्षियूथपम् ।
उत्पपात पुनर्हृष्टो मैथिलीं गृह्य रावणः ॥ १७
तं प्रहृष्टं निधायाङ्के गच्छन्तं जनकात्मजाम् ।
गृध्रराजः समुत्पत्य जटायुरिदमब्रवीत् ॥ १८
वज्रसंस्पर्शबाणस्य भार्यां रामस्य रावण ।
अल्पबुद्धे हरस्येनां वधाय खलु रक्षसाम् ॥ १९
समित्रबन्धुः सामात्यः सबलः सपरिच्छदः ।
विषपानं पिबस्येतत्पिपासित इवोदकम् ॥ २०
अनुबन्धमजानन्तः कर्मणामविचक्षणाः ।
शीघ्रमेव विनश्यन्ति यथा त्वं विनशिष्यसि ॥ २१
बद्धस्त्वं कालपाशेन क्व गतस्तस्य मोक्ष्यसे ।
वधाय बडिशं गृह्य सामिषं जलजो यथा ॥ २२

15 ^{a}) T2 छिन्न- (for भग्न-) I1 transp स and भग्नधन्वा —^{c}) D2 अकमादाय (for अङ्केना°) —^{d}) Ś1 D2 3 उत्पपाताशु (D2 1 °थ), D1 उत्पपात स (for पपात भुवि) M1 राक्षस (for रावण)

16 Ś1 D1-3 om (hapl) 16-17 —^{a}) Dt1 D6 8 G1 निपातित, M1 त पतित (for निपतित) —^{b}) I2 छिन्नवाहन —^{d}) I2 पक्षिराजम् (for गृध्र°) —After 16, Ñ2 V1 B1 3 4 D5 7 ins 966*

17 Ś1 D1-3 5 om 17 (for all except D5, cf v l 16) —^{a}) V1 परिश्रात (for °श्रान्त) Ñ2 V1 B1 3 D7 स त (for तु त) —^{b}) V1 जरसा (for जरया) Ñ2 V1 B1 3 4 D7 पक्षिपुगव (for °यूथपम्) —V1 om 17^{cd} —^{c}) Ñ2 D7 ततो (for पुनर्) —^{d}) Ñ2 B1 3 4 D7 सीतामादाय (for मैथिलीं गृह्य)

18 ^{a}) Ñ2 V1 B1 3 D7 ता (for त) Ñ2 V1 B1 3 4 D5 7 प्रगृह्य, D1 2 त्वरत (for प्रहृष्ट) B1 3 Dt1 D2 निधायाके, G(ed) निजे चाके (for निधायाङ्के) —^{b}) Ñ V1 B1 3 4 D1-3 5 7 हरत, Dt1 D6 रावण (for गच्छन्त) Ñ1 मैथिलीं बलात् —After 18^{ab}, Dt1 D6 ins

970* गच्छन्त खड्गशेष च प्रनष्टहतसाधनम् ।

—^{c}) V1 B1 4 समुत्पत्य —After 18^{c}, Dg1 Dt1 Dm1 D4 6 8 S ins

971* समभिद्रुत्य रावणम् ।
समासार्य महातेजा

[(l 1) D4 M3 तमभिद्रुत्य, I2 समनु°, Cg as above (for समभिद्रुत्य) Dt1 Dm1 D6 8 रावण समभिद्रवत्, M2 रावण राक्षसेश्वर —(l 2) Dm1 D8 G3 Ck तमा(Ck तदा)वार्य, D4 समादाय, Cm g t as above (for समावार्य)]

—For 18, Ś1 subst

972* अथ ता नेतुकामस्य रावणस्यातिकोपित ।
जटायुरब्रवीद्वाक्यमिद न्याय्यार्थसयुतम् ।

—After 18, M2 3 ins

973* तिष्ठ तिष्ठ दशग्रीव न मे जीवन्विमोक्ष्यसे ।

19 Ś1 om 19^{ab} —^{c}) M3 (before corr) हत- (for अल्प-) D1 3 रहसि (meta) (for हरसि). V1 B1 3 4 [ए]ता (for [ए]ना) M3 अल्प..द्धे रस्ये.. (damaged). —^{d}) M3 damaged for वधाय M1 किल (for खलु) Ñ1 B1 वधार्थं सर्वरक्षसा.

20 ^{ab}) Dt1 सामात्य- (for मात्य) Ś1 D1 2 यदा (Ś1 याता) समित्रबधुस्त्व, Ñ1 सामात्यमित्रबधुस्त्व, D3 यथा सबधुमित्रश्च D2 सबल (for °ल) V1 B1 3 4 D5 7 transp सामात्य and सबल —After 20^{ab}, Ś1 D2 ins

974* यमस्य लोक बाणार्नो रामस्य शरपीडित ।
[L(ed) -नर्दित (for -पीडित)]

—^{c}) D1 विष पान (for विष°) I1 2 G3 क्रोध्येनत् (for पिबस्येतत्) —^{d}) V1 पिपासाने (for पिपासित). Dt1 reads सित इवोदकम् in marg

21 Ś1 D1-3 read 21 after 27 —^{a}) Ñ1 येनुबन्धम् (for अनु°) —^{b}) Dg1 ह्यविचक्षणा., Ñ2 कर्म ...... णा —After 21^{ab}, Ś1 D1-3 ins

975* समित्रयान्धवजना सामात्या सपरिच्छदा ।
[Ś1 D2 बाधवा जाना (for -बान्धवजना)]

—^{c}) Ś1 Dg1 D1-3 I2 क्षिप्रम् (for शीघ्रम्) Dg1 च नश्यति, D5 [अ]बनश्यति, D7 विनश्यंति, G3 नशिष्यति (for विनश्यन्ति) —^{d}) Ś1 तथा त्व न विनश्यसि, Ñ2 V1 B1 3 4 D5 7 यथा हि त्व (B1 त्व हि) विनक्ष्यसि, G3 यथा स त्व नशिष्यसि

22 ^{b}) Ñ1 B4 Dg1 D1 2 4 5 7 8 मोक्षसे, Cm g as in text (for मोक्ष्यसे) Ś1 D3 त्व विमोक्ष(D3 °क्ष्य)से, V1 त्व हि मोक्षसे, M1 3 शर्म लप्स्यसे (for तस्य मोक्ष्यसे). —^{cd}) S1 वधाय (for वधाय) D3 बलिस, M1 शबल, Ck बडिश, Ct as in text (for बडिश) Ñ2 V1 B1 3 4 D5 7 बडिषा (V1 बालिशा)मिषमादाय वधाय मकरो यथा —After 22, Ñ2 V1 B1 3 4 D5 7 ins

976* सिंहो वा धर्षणा प्राप्य पादस्पर्शमिवोरग ।
मैथिल्या स परामर्षं राघवो न सहिष्यति ।
[(l 2) B1 हि मृष्यति (for सहिष्यति)]

न हि जातु दुराधर्षौ काकुत्स्थौ तव रावण ।
धर्षणं चाश्रमस्यास्य क्षमिष्येते तु राघवौ ॥ २३
यथा त्वया कृतं कर्म भीरुणा लोकगर्हितम् ।
तस्कराचरितो मार्गो नैष वीरनिषेवितः ॥ २४
युध्यस्व यदि शूरोऽसि मुहूर्तं तिष्ठ रावण ।
शयिष्यसे हतो भूमौ यथा भ्राता खरस्तथा ॥ २५
परेतकाले पुरुषो यत्कर्म प्रतिपद्यते ।
विनाशायात्मनोऽधर्म्यं प्रतिपन्नोऽसि कर्म तत् ॥ २६
पापानुबन्धो वै यस्य कर्मणः को नु तत्पुमान् ।
कुर्वीत लोकाधिपतिः स्वयंभूर्भगवानपि ॥ २७
एवमुक्त्वा शुभं वाक्यं जटायुस्तस्य रक्षसः ।
निपपात भृशं पृष्ठे दशग्रीवस्य वीर्यवान् ॥ २८

G 3 57 21
B 3 51 33
L 3 57 13

23 ^a) D3 G2 तु (for हि) Ñ1 राजन्, Dt1 D4 जातौ (for जातु) Ś1 D1 2 °र्षौ, V1 परा°, B1 3 4 °धर्षौ (for दुराधर्षौ) —^b) Ś1 Ñ1 D1–3 धर्मसेतु (Ñ1 °हेतो, D1 2 °सेतु) प्रधर्षणा (D1 °*°, D2 °धर्षणात्), Ñ2 V1 B1 3 4 D5 7 धर्मदारप्रधर्षणा (V1 °णात्), G (ed) धर्मदारपराभवं —^c) Ś1 सीतायाश्, V1 धर्माणा, B1 3 4 D2 5 7 धर्षणा (for धर्षणं) B1 D2 5 वा (for च) —^d) Ś1 D2 राघवो मर्षयिष्यति, Ñ1 राघव प्रसहिष्यति, Ñ2 V1 B1 3 4 D5.7 सहेते रामलक्ष्मणौ, D1 राघवो न सहिष्यति, D3 राघवौ मर्षयिष्यत

24 Ñ1 om 24^{ab} —For 24^{ab}, Ñ2 V1 B1 3 4 D5 7 subst, while Ś1 D1–3 subst l 3 only for 24^{ab}

977* इमा तस्करभावेन क्रूर पाप नृशंसकृत् ।
यथोपनयसे सीता प्रोक्षितस्त्व यथा पशु ।
हत्वा वा हरते शूर शेते वा निहत परै ।

[(l 3) Ñ2 B1 3 (also) 4 D5 7 शरे (for परै)] —Ś1 om 24^c–25 —^d) D2 [ए]व (for [ए]ष) Ñ2 V1 B1 3 4 D5 7 शूर- (for वीर-) —After 24, D1 ins l 1 of 979* and cont, while Ś1 cont after 977*, D2 3 ins after 24

978* नचिराद्रघुशार्दूल स त्वा पाप हनिष्यति ।
[D1 अचिराद्युद्ध (for नचिराद्रघु-)]

25 Ś1 D2 om 25 (for Ś1, cf v l 24) —^a) T1 वीरोसि (for शूरोऽसि) —^c) Dg1 Dt1 D1 3 6 8 G2 3 M3 शयिष्यसि (for °से) —^d) Ñ B1 3 4 D3 5 7 G1 तव (for तथा) —After 25, Ñ2 V1 B1 3 4 D5 7 ins, Ñ1 D3 ins l 1–2 only, while D1 ins l 1 only after 24

979* असकृत्सयुगे येन निहता दैत्यदानवा ।
नचिराच्चीरवासास्त्वा राघवो निहनिष्यति ।
रामो दाशरथि श्रीमान्क्षत्रधर्मपथे स्थित ।
एवमुक्तो राक्षसेन्द्र पक्षीन्द्रेण स गर्वित ।
रोषसरक्तनयन इद वचनमब्रवीत् ।
सौहार्दं दर्शित राजस्त्वया दशरथस्य हि ।
रामस्य च तथानृण्य गच्छ त्व मा कृथा श्रमम् ।
एवमुक्तोऽब्रवीद्वाक्यमविश्रान्त खगोत्तम ।
यत्ते तेजो बल शक्ति पौरुष यच्च ते महत् ।
तद्दर्शय न मे क्रूर जीवन्प्रतिगमिष्यसि ।

[(l 1) V1 तेन (for येन) —(l 2) D3 अचिरात् (for नचिरात्) D3 स रामो (for राघवो) Ñ1 स रावण वधिष्यति (for the post half) —(l 3) B4 क्षत्रधर्मे व्यवस्थित, G (ed) क्षत्रधर्मेव्यवस्थित (for the post half) —(l 4) V1 B1 (also) तु रक्षेंद्र (for राक्षसेन्द्र) B3 4 सगर्वित (for स गर्वित) —(l 6) D5 मोहार्दाद् (for °द) Ñ2 D5 7 च (for हि) —(l 7) V1 om च (subm), B1 रामस्य हि, B4 राघवस्य (for रामस्य च) V1 B4 यथा (for तथा) B3 नूनं (for [अ]नृण्य) V1 गम्यते, B1 गतस्त्व, B3 4 गम्यता (for गच्छ त्व) —(l. 8) Ñ2 B3 D5 7 अविभ्रात, B1 स विश्रात (for अविश्रान्त) —(l 10) Ñ2 क्रुद्ध (for क्रूर) B3 अद्य गमिष्यसि (for प्रतिगमिष्यसि)]

26 ^a) Ñ V1 B1 3 4 D1–3 5 7 परीतकाल (for परेतकाले) Ś1 परीतकालो हि त्वया —^b) D6 प्रतिपद्यसे (for °पद्यते) Ś1 य कर्म प्रतिपद्यते —^c) Ś1 D2 G2 [ऽ]धर्मं, Ñ2 V1 B1 3 4 तस्मात्, D1 3 [ऽ]धर्मात्, D5 7 तत्स्यात्, T3 [ऽ]नित्य (for ऽधर्म्यं). Ñ1 विनाशमात्मनोधर्मात् —^d) Ś1 [ऽ]स्मि, B3 हि (for ऽसि) Ś1 D3 कर्मकृत्, Ñ1 धर्मत, V1 रावण, B1 3 4 तच्च हि (for कर्म तत्) Ñ2 D5 7 प्रपन्नो गर्हितं च तत्

27 D1 om 27^{ab} —^a) Ś1 यस्यास्य, Ñ1 Dg1 I3 M3 यो यस्य, Ñ2 V1 B1 3 4 D2 3 5 7 यस्य स्यात्, D4 T1 वैरस्य (for वै यस्य) T2 पापानुबद्धितैर्यस्य (sic) —^b) Ś1 D2 3 को नु कर्मकृत्, Ñ1 कर्मकोविद, Ñ2 V1 B1 3 4 D5 7 पाप को नु तत्, D4 T1 G1 2 Cr g k कर्म को नु तत्, M2 कर्मगो नु तत्, Ct as in text (for को नु तत्पुमान्) T2 कर्म न स्यात्तु को नु तत् (sic) —^d) D3 इति (for अपि) —After 27, Ś1 D1–3 read 21, while Ñ2 V1 B1 3 4 D5 7 ins

980* अक्षमोऽसत्यसधश्च परदारी नृशसकृत् ।
पच्यते नरकेष्वेव दह्यमान स्वकर्मणा ।

[(l 1) B1 4 आ क्रूरो (for अक्षमो) V1 D5 परदार- (for °दारी) —(l 2) B1 नरके चैव, B3 नरके घोरे (for नरकेष्वेव) B1 दशग्रीव (for दह्यमान)]

28 ^a) G2 भृश (for शुभ) —^b) Ñ1 राक्षसेश्वर (for तस्य रक्षस) —^c) D4 स पपात (for नि°) —^d) D3 पृष्ठत (for वीर्यवान्) —After 28, Ñ2 V1 B1 3 4 D5 7 ins

981* गजाङ्कुशनिभैस्तीक्ष्णैरर्पयित्वा भुजान्तरे ।
नखतुण्डप्रहारैस्तु राक्षसो विह्वलीकृत ।

G 3 51 23
B 3 51 34
L 3 51 11
तं गृहीत्वा नखैस्तीक्ष्णैर्विरराद समन्ततः ।
अधिरूढो गजारोहो यथा स्याद्दुष्टवारणम् ॥ २९
विरराद नखैरस्य तुण्डं पृष्ठे समर्पयन् ।
केशांश्चोत्पाटयामास नखपक्षमुखायुधः ॥ ३०
स तथा गृध्रराजेन क्लिश्यमानो मुहुर्मुहुः ।
अमर्षस्फुरितोष्ठः सन्प्राकम्पत स राक्षसः ॥ ३१
संपरिष्वज्य वैदेहीं वामेनाङ्केन रावणः ।
तलेनाभिजघानार्तो जटायुं क्रोधमूर्छितः ॥ ३२
जटायुस्तमतिक्रम्य तुण्डेनास्य खगाधिपः ।
वामबाहून्दश तदा व्यपाहरदरिंदमः ॥ ३३
ततः क्रुद्धो दशग्रीवः सीतामुत्सृज्य वीर्यवान् ।
मुष्टिभ्यां चरणाभ्यां च गृध्रराजमपोथयत् ॥ ३४
ततो मुहूर्तं संग्रामो बभूवातुलवीर्ययोः ।
राक्षसानां च मुख्यस्य पक्षिणां प्रवरस्य च ॥ ३५

[(l 1) V1 वज्राकुश V1 तीव्रेर् (for तीक्ष्णर्) V1 B4 अर्दयित्वा, B1 दारयित्वा (for जर्पयित्वा) V1 स्तनातरे, B3 D5 भुजातर (for भुजान्तरे) —(l 2) B4 च (for तु) V1 विक्लीकृत, B3 न्याकुली°, D5 7 विद्ली° (for विह्लीकृत)]

29 B3 reads 29^{a} in marg —^{a}) Ś1 D2 स वितुडो (D2 °ड), Ñ1 D3 स गृहीत्वा, Ñ2 V1 B1 4 D5 7 स गृहीतो, D1 स विनुन्नो (for त गृहीत्वा) —^{b}) Ś1 D1 तस्य पृष्ठ, Ñ1 Dg1 Dt1 D2–4 6 8 T2 3 विददार, Ñ2 V1 विचचार, B1 3 4 D5 7 विचचाल, Cg k as in text (for विरराद) ❀ Ct 'विरराद' इति पाठेऽपि क्षतानि चकारेत्येवार्थ. ❀ Ñ1 महाबल, G2 [आ]समतत (for समन्तत) —Ś1 D1 om 29^{c}–30^{b} —^{c}) Ñ2 B4 D5 7 अधिरूढे, V1 आवरोहे, D2 अविक्षेपो, M2 °रूपो, L(ed) अवरूढो (for अधिरूढो) Ñ2 V1 B4 D5–7 गजारोहे, B1 गजावाहे, Dt1 गतारोहो, D2 3 वरारोहैर्, T2 गजारूढो, Ct as in text (for गजारोहो) B1 3 अधिरूढगजारो(B3 °वा)हे —^{d}) V1 यदा (for यथा) Ñ2 V1 B1 3 4 D5 7 चलितो गज, D2 3 दुष्टवारण (for दुष्टवारणम्)

30 Ś1 D1 om 30^{ab} (cf v l 29) —^{a}) Ñ V1 B1 3 4 Dg1 Dt1 D4–8 T2 3 Ct विददार, D2 3 स विदार्य, Cg k as in text (for विरराद) Ñ1 तथा (for नखैर्) Ñ V1 B1 3 4 Dg1 D5 7 तस्य, Dm1 D8 G3 तुड, D2 3 तीक्ष्णे, G2 यस्य, Cg t as in text (for अस्य) —^{b}) Ñ1 नखै, Dm1 D2 3 8 G3 तस्य (for तुण्ड) D2 3 पृष्ठ (for पृष्ठे) Ñ1 D2 3 समतत, T1 2 °र्पयत् (for समर्पयन्) Ñ2 V1 B1 3 4 D5 7 पृष्ठ स पतगेश्वर —After 30^{ab}, Ñ2 V1 B1 3 4 D5 7 ins

982* तीक्ष्णतुण्डार्पणग्रीवा नखै सर्वां व्यदारयत् ।
वेदनापीडिताक्षीणि वदनानि चकार स ।

[(l 1) D7 तीक्ष्ण (for तीक्ष्ण) V1 नखतुडार्पितग्रीवा (for the prior half) Ñ2 D5 7 चैव (for सर्वां) V1 मर्मान्विदारयन्] —V1 om 30^{c}–31^{b} —^{d}) M1 मुखायुधै Ñ1 तुडपक्षनखायुध, Ñ2 B1 3 4 D5 7 पक्षतुडनखायुध

31 V1 om 31^{ab} (cf v l 30) —^{a}) Dg1 तदा तु, Dt1 D4 6 G1 2 M3 स तदा, D2 स यथा, T3 तथा तु (for स तथा) —^{b}) B1 D3 कृष्यमाणो, D2 क्लिष्टमानो (for क्लिश्यमानो) —^{c}) Dm1 अमर्ष (for अमर्ष-) D1 तु, D2 3 च (for सन्) M2 अमर्षस्फुटितोरस्कस् —^{d}) Dt1 D6 M3 च (for स) M2 transp प्राकपत and स Dm1 D4 8 T1 2 G3 रावण (for राक्षस) —For 31^{cd}, Ś1 Ñ V1 B1 3 4 D1–3 5 7 subst

983* अमर्षात्स्फुरमाणोष्ठ समकम्पत राक्षस ।

[Ś1 D1–3 स्फुरितोष्ठश्च(D1 °स्तु); D5 स्फुरमाणोष्ठ (for स्फुरमाणोष्ठ) D7 अमर्षस्फुरमाणोष्ठ (for the prior half) Ś1 Ñ1 D1–3 स प्राकपत (for सम°)]

32 Ñ1 om 32–33 D5 7 om 32 —^{a}) Ś1 D1–3 ता परिष्वज्य, Ñ2 V1 B1 3 4 परिगृह्य च, T2 M1 3 स परिष्वज्य (for सपरिष्वज्य) —^{c}) Ś1 D1–3 [अ]थ जघान (for [अ]भिजघान) —^{d}) Ś1 D1–3 जटायुषममर्षण, Ñ2 सुसक्रुद्धो जटायुष, V1 B1 3 4 सक्रुद्धस्त(B4 °स्तु) जटायुष ❀ Cg जटायुरित्युकारान्तोऽप्यस्ति ❀

33 Ś1 Ñ1 V1 D1–3 om 33 (for Ñ1, cf v l 32) —^{a}) D4 T1 G1 2 M2 अभिक्रम्य, M3 अभिद्रुत्य (for अतिक्रम्य) —^{c}) T2 ततो, T3 तथा (for तदा) —^{d}) Dg1 Dm1 D6 व्यापाहरद् (for व्य°) —For 33, Ñ2 B1 3 4 D5 7 subst

984* जटायुरपि सक्रुद्ध पक्षतुण्डनखैर्मुहु ।
चकार रावण सख्ये फुल्लाशोकसमप्रभम् ।
[(l 2) B3 पक्षी (for सख्ये)]

—After 33, Dg1 Dt1 Dm1 D4 6 8 S ins

985* सच्छिन्नबाहो सद्यो वै बाहव सहसाभवन् ।
विषज्वालावलीयुक्ता वल्मीकादिव पन्नगा ।

[(l 1) Dg1 Dm1 D4 8 T2 G– Cg मयैव, G1 सदैव, M1 3 तस्यव, Ck as above (for सद्यो व) ❀ Cg मयैवेत्यार्षं मलोपे वृद्धि ❀ G2 सदृशा (for सहसा) —(l 2) D6 पन्नगा इव (by transp)]

34 ^{a}) Ś1 D1–3 तस्य, Ñ2 V1 B1 3 4 D5 7 पुन (for तत) Dg1 Dt1 Dm1 D4 6 8 T G M2 3 क्रोधाद् (for क्रुद्धो) —^{b}) M1 उद्दिश्य (for उत्सृज्य) K(ed) रावण (for वीर्यवान्) —^{c}) D3 मुष्टिभिश्च (for मुष्टिभ्या) —^{d}) Ś1 D1–3 जटायुषम्, M2 पक्षिराजम् (for गृध्रराजम्) Dg1 T2 3 अताडयत्, Cg as in text (for अपोथयत्)

35 ^{a}) Ś1 Ñ B1 3 4 D1–3 5, 7 तयोर् (for ततो) —^{b})

तस्य व्यायच्छमानस्य रामस्यार्थेऽथ रावणः ।
पक्षौ पादौ च पार्श्वौ च खड्गमुद्धृत्य सोऽच्छिनत् ॥ ३६

स छिन्नपक्षः सहसा रक्षसा रौद्रकर्मणा ।
निपपात हतो गृध्रो धरण्यामल्पजीवितः ॥ ३७

तं दृष्ट्वा पतितं भूमौ क्षतजार्द्रं जटायुषम् ।
अभ्यधावत वैदेही स्वबन्धुमिव दुःखिता ॥ ३८

तं नीलजीमूतनिकाशकल्पं
सुपाण्डुरोरस्कमुदारवीर्यम् ।
ददर्श लङ्काधिपतिः पृथिव्यां
जटायुषं शान्तमिवाग्निदावम् ॥ ३९

ततस्तु तं पत्ररथं महीतले
निपातितं रावणवेगमर्दितम् ।
पुनः परिष्वज्य शशिप्रभानना
रुरोद सीता जनकात्मजा तदा ॥ ४० G 3 57 35 B 3 51 40 L 3 57 24

इति श्रीरामायणे अरण्यकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

B1 [अ]द्भुत, Dg1 D3 G1 M3 [अ]तुल्य- (for [अ]तुल-) D2 M1 वीर्यवान् (for -वीर्ययो) —[c]) Ś1 तु, D4 om (subm) (for च) —[d]) D1 पक्षिण॰, D5 पत्रिणा (for पक्षिणा) —After 35, Ñ1 ins

986* तस्य तुण्डप्रहारेण राक्षसो बलिना वर ।
निहतो निपपातो ...

36 [a]) Ñ1 ... मानस्य (illeg), Ñ2 V1 B1 3 4 D5 7 प्रयतमानस्य (for व्यायच्छमानस्य) —[b]) Ś1 D1 2 राघवार्थे(D1 °र्थं) (for रामस्यार्थे) Ś1 Ñ V1 B1.3 4 Dt1 D1–3 5–7 G1 स, D4 तु (for ऽथ) —Ñ1 illeg from first च up to ऽच्छिनत् in [d] —[c]) Ñ1 पद्यौ (for पक्षौ) S1 D1–3 तुड, Ñ1 पक्षौ, B1 पाद, Dg1 G2 M2 पार्श्वं, Dm1 D4 8 T2 3 G3 Cg पार्श्वौ, D6 om (for पादौ) G1 च पार्श्वं (for पादौ च) Ś1 Dg1 Dm1 D1–4 8 T G M2 पादौ च, Ñ2 D5 7 सहसा, V1 B1 3 4 पार्श्वं च (for पार्श्वौ च). M3 क्रुद्ध पक्षौ च पार्श्वं च —[d]) Dg1 उद्यम्य (for उद्धृत्य) M3 चाच्छिनत् (for सोऽच्छि°) Ś1 D1–3 खड्गमुद्यम्य चिच्छिदे, Ñ2 V1 B3 4 D5 7 चिच्छेदोद्यम्य सायक, B1 चिच्छेदायतकार्मुक

37 [a]) D4 T1 2 G1 3 M सच्छिन्न, Cg as in text (for स छिन्न-) Ñ1 illeg for सहसा —[b]) D4 G1 तरसा, D7 om (hapl) (for रक्षसा) Dm1 D4 8 G1 3 घोर, D3 M2 क्रूर- (for रौद्र-) G2 रूपिणा (for कर्मणा) —[c]) Ś1 Ñ V1 B3 Dg1 Dm1 D1 2 4 5 7 8 M2 3 ततो, B4 Dt1 D6 G1 3 महा (for हतो)

38 [ab]) Ś1 Ñ1 D1–4 दृष्ट्वा निपतित (for त दृष्ट्वा पतित) Ñ1 illeg, from भूमौ up to ज in जटा° in [b]. V1 क्षतार्द्रंगतजीवितम् —[c]) Ñ1 अभ्यवर्तत (for °धावत) —[d]) V1 सुबधुम्

39 [a]) Ñ2 V1 B1 3 4 D5 7 कृष्ण- (for नील) Ś1 D1–3 नि(D1 स)काशवर्णं, Ñ2 V1 B1 3 4 D5 7 °काय, G1 °रूप, M3 °गात्र (for -निकाशकल्प) —[b]) Ñ1 Dt1 D6 स पाडुरोरस्कम्, Ñ2 B1 3 4 स(Ñ2 सु)पाडरोवक्षम् (sic) (B4 °रोरस्कम्) Ñ2 V1 B3 1 D5 7 -सत्त्व, B1 काय (for -वीर्यम्) —[c]) Ñ1 शयान, Ñ2 V1 B1 3 4 D5 7 जटायुष (for पृथिव्या) —[d]) Ñ1 illeg after शा in शान्तम् Ñ2 V1 B1 3 4 D5 7 हत पृथिव्या कृपण स्फुरत ❀ Cv अत्र निकाशकल्पशब्दाभ्यामपि तुल्यतैवोच्यते। अवमन्यताप्येकस्मिन्नर्थे पर्यायद्वयप्रयोग कविमुनिना शैली । अथवा जीमूतप्रकाशतुल्यमिति यावत्। अग्निदाव दावाग्नि। अथवा अग्निश्चासौ दावश्चेति अग्निदाव । दावशब्दो वनवाचकोऽप्यस्तीत्यग्निविशेषणप्रयोग ।, Ck अग्निदावमिति विशेषणस्य पूर्वनिपात आर्ष दावाग्निमिति यावत्।, Ct अग्निदाव दावाग्नि परनिपात आर्ष ❀

40 [a]) G2 महाबल (for महीतले) —[b]) S1 Ñ1 D1–3 -वेगनिर्जित, Ñ2 V1 B1 3 4 D5 7 खड्गनिर्जित (for -वेगमर्दितम्) —[c]) Ñ2 V1 B3 4 D5 7 तत॰, B1 भृश (for पुन) G3 damaged for रिष्वज्य श —[d]) Ñ2 D5 7 सती, B3 भृश (for तदा)

Colophon —*Sarga name* Ś1 D2 सीताप्रमाथे जटायुवधो, Ñ V1 B1 3 4 D3 5 7 जटायुर्वध, D1 जटायुषो वधो —*Sarga no* (figures, words or both) Ś1 Ñ1 B1 3 D2 om, Ñ2 D5 7 57, V1 56, B4 D3 58, Dg1 Dt1 Dm1 D6 8 T G M1 2 51, D1 54, D1 53, M3 52 G concludes with श्रीरामाय नम,

५०

G 3 58 1
B 3 52 1
L 3 58 1

तमल्पजीवितं भूमौ स्फुरन्तं राक्षसाधिपः ।
ददर्श गृध्रं पतितं समीपे राघवाश्रमात् ॥ १
सा तु ताराधिपमुखी रावणेन समीक्ष्य तम् ।
गृध्रराजं विनिहतं विललाप सुदुःखिता ॥ २
निमित्तं लक्षणज्ञानं शकुनिस्वरदर्शनम् ।
अवश्यं सुखदुःखेषु नराणां प्रतिदृश्यते ॥ ३
न नूनं राम जानासि महद्व्यसनमात्मनः ।
धावन्ति नूनं काकुत्स्थ मदर्थं मृगपक्षिणः ॥ ४

50

V2 illeg for Sarga 50 (cf v l 3 46 7) M1 begins with श्रीरामाय नमः

1 Dg1 Dt1 D6 T1 3 G1 M1 3 om 1 —[a]) D3 ततो (for तम्) D3 अस्य (for अल्प-) K(ed) गृध्र (for भूमौ) —[b]) D3 रक्षसा हत (for राक्षसाधिप·) Ś1 D1 2 क्षतजार्द्रं जटायुष —[cd]) Ś1 Ñ1 D1–4 गृध्राधिपति (for गृध्र पतित) Ñ1 राघवाश्रमे (for °श्रमात्) Ñ2 V1 B1 3 4 D5 7 दृष्ट्वा निपतित तत्र (B1 3 4 भूमौ) शोणितार्द्रं विचेतन (B4 °स) —After 1, Ñ2 V1 B1 3 4 D5 7 ins

987* न्यस्य भूमौ च वैदेहीं सारथि चावलोकयन् ।
पिशाचवदनास्ताश्च रथ मायामय च तम् ।
रावणश्छत्रधार च वालव्यजनधारिणौ ।
निहतान्गृध्रराजेन सोऽपश्यद्धरणीतले ।

[(l 1) V1 om first च (subm) —(l 2) B1 तु (for first च) —(l 3) Ñ2 त (for च) B4 राज (for वाल)]

2 G3 partly damaged for [a] —[a]) Ś1 D2 3 सीता, B1 सापि (for सा तु) G2 -मुख (for -मुखी) D1 निहत पक्षिराज च —[b]) Ñ2 Dt1 D4 6 G1 3 M1 निरीक्ष्य त, V1 B1 3 4 D5 7 परिक्षत, D1–3 च वीक्ष्य त (for समीक्ष्य तम्) —[c]) Ñ2 V1 B1 3 4 D5 7 निपतित (for विनिहत) —[d]) D6 सुदु खित (for °ता) —After 2, D8(marg) T1 2 G3 ins

988* आलिङ्ग्य गृध्र निहत रावणेन बलीयसा ।
विललाप सुदु खार्ता सीता शशिनिभानना ।

[T2 G3 transp the post halves of l 1 and 2]

3 [a]) Ñ2 B1 D7 G1 निमित्त- (for °त्त) B3 D3 4 T1 2 लक्षण ज्ञान, Dt1 D6 Ck t लक्षण स्वप्न, D2 लक्षण ज्ञात, G1 M3 लक्षणज्ञाना, Cv r m g as in text (for लक्षणज्ञान) Ś1 निमित्तलक्षण ज्ञान, Ñ1 निमित्तेन ⁎ ⁎ ⁎ ※ Cv अन्ये पुनर्निमित्त लक्षण ज्ञान शकुनिस्वरदर्शनमिति पाठमङ्गीकृत्य एव व्याचक्षते। निमित्त गोमाय्वादिक लक्षणमङ्गस्पन्दनादिक ज्ञान यदृच्छया तथा प्रतिभास । अय च नियमो गोवलीवर्दन्यायेनेति ।, Ct "लक्षणज्ञानम्" इति पाठेऽङ्गस्फुरणादिज्ञानमित्यर्थ ※ —[b]) Ś1 ज्ञानिना, Ñ2 V1 B1 3 4 D1–3 5 7 शा(V1 D1 7 श)कुन, D4 शकुनि (for शकुनि-) G3 damaged from दर्शनम् up to दु खेषु in [c] Ñ1 स्वप्न-दर्शिना, V1 D5 7 शुभदर्शन, B1 3 4 D3 स्वप्नदर्शन, Dg1 T3 G2 M1 स्वनदर्शन (for -स्वरदर्शनम्) —[d]) Ñ1 इह दृश्यते, Ñ2 Dt1 D6 Ct परिदृश्यते, V1 B1 3 4 Dm1 D5 7 8 T2 G3 M1 3 सप्र(B1 प्रत्य)दृश्यते, Cg k as in text (for प्रतिदृश्यते) —After 3, Ñ2 V1 B1 3 4 D5 7 ins

989* त्व हि तातो नरेन्द्रस्य राघवस्य महात्मनः ।
निधन तव पक्षीन्द्र मत्कृते जातमीदृशम् ।
त्व हि राजा दशरथो मिथिलाधिपति पिता ।
त्व हि नाथो नरेन्द्रस्य राघवस्य महात्मन ।
भवता पक्षपातेन राघवस्य महात्मना । [5]
कृत युद्ध महाप्राज्ञ प्राप्तश्चान्त सुदारुण ।
जीवन्तीं योऽपि मा रामे ब्रूयाद्विगता सतीम् ।
स शेते निहतो भूमौ कालोऽय मरणस्य मे ।

[(l 1) Ñ2 V1 B4 D5 7 तात (for तातो) Ñ2 D5 7 यथा पिता (for महात्मन) V1 B4 महद्व्यसनमागत (for the post half) —(l 3) B3 च (for हि) —B3 reads l 5 in marg —(l 5) Ñ2 D5 7 महात्मन, B3 महामते (for महात्मना) —(l 6) Ñ2 B4 D7 [अ]त, D5 [अ]ते (for [अ]न्त). Ñ2 D5 7 सुदारुण (for °ण) —(l 7) Ñ2 D5 7 मा च यो (for योऽपि मा)]

4 [a]) B3 T1 नून राम न (by transp), M1 राम राम न (for न नून राम) D8 जानीहि (for जानासि) Ñ2 B1 4 D5 7 T2 G2 M3 नून रामो न जानाति —[b]) G2 महाव्यसनम्. Ñ2 V1 B1 3 4 D5 7 आगत (for आत्मन). —B1 om 4[cd]. —[c]) Ś1 D3 तथैव, D1 2 तवैव (for धावन्ति) D4 T1 2 G M1 3 काकुत्स्थ (for °त्स्थ) —[d]) T2 मदर्थे (for मदर्थं). Ś1 D1–3 अनर्था सह(D1 2 सग [sic])चारिण —For 4[cd], Ñ(Ñ1 partly illeg) V1 B3 4 D5 7 subst

990* न चासौ तव काकुत्स्थो ह्यनर्थसहचारिण ।

[V1 ह्यनर्थनिसवारिण, G(ed) सज्यधन्वात्र चारिण (for the post. half)]

—After 4, Dg1 Dt1 Dm1 D4 6 8 S ins

991* अय हि पापचारेण मा त्रातुमभिसगत. ।
शेते विनिहतो भूमौ ममाभाग्याद्विहगम ।

[(l. 1) G1 तु (for हि) Dg1 D4 G1 3 M2 पापाचारेण, Dt1 D6 कृपया राम, Cm g as above (for पापचारेण). Dg1 Dt1 D6 T3 इह सगत, T2 अभिगच्छति (for अभिसगत).

त्राहि मामद्य काकुत्स्थ लक्ष्मणेति वराङ्गना ।
सुसंत्रस्ता समाक्रन्दच्छृण्वतां तु यथान्तिके ॥ ५
तां क्लिष्टमाल्याभरणां विलपन्तीमनाथवत् ।
अभ्यधावत वैदेहीं रावणो राक्षसाधिपः ॥ ६
तां लतामिव वेष्टन्तीमालिङ्गन्तीं महाद्रुमान् ।
मुञ्च मुञ्चेति बहुशः प्रवदन्राक्षसाधिपः ॥ ७
क्रोशन्तीं राम रामेति रामेण रहितां वने ।
जीवितान्ताय केशेषु जग्राहान्तकसंनिभः ॥ ८
प्रधर्षितायां वैदेह्यां बभूव सचराचरम् ।
जगत्सर्वममर्यादं तमसान्धेन संवृतम् ॥ ९
दृष्ट्वा सीतां परामृष्टां दीनां दिव्येन चक्षुषा ।
कृतं कार्यमिति श्रीमान्व्याजहार पितामहः ॥ १०
प्रहृष्टा व्यथिताश्चासन्सर्वे ते परमर्षयः ।
दृष्ट्वा सीतां परामृष्टां दण्डकारण्यवासिनः ॥ ११

G. 3 58 15
B. 3 52 12
L. 3 58 11

—(l 2) G1 M1 मम भाग्याद् M3 मम भाग्यविपर्ययात् (for the post half)]
—M2 cont

992* रावणेन हता मा हि कथयित्वा विहगम ।
राघवाभ्यां यथातत्त्वमथो हास्यसि जीवितम् ।
आदेहपात पक्षीश युध्यता रावणेन यत् ।
त्वया विदर्शित स्नेह श्वशुरे मम रावचे ।
जटायो हरण यावन्मम रामाय वक्ष्यसि । [5]
तावच्छरीरे ते प्राणा सचरन्ति हि धीरपि ।
इति पक्षि समालिङ्ग्य स्मृत्वा श्वशुरमेव च ।
उच्चै स्वरेण चुक्रोश हा राघव न पश्यसि ।

5 ^{a}) M2 पाहि (for त्राहि) —^{b}) G2 वरानना (for °ङ्गना) —^{c}) G1 तथाक्रदच् (for समा°) —^{d}) T3 श्रुत्वा ता (for शृण्वता) Dm1 D8 यथातिक, Cm g k t यथातिके (as in text) —For 5, Ś1 D1–3 subst

993* असकृद्राम रामेति तथा लक्ष्मणमङ्गना ।
आक्रन्दमाना सत्रस्ता किनरीव वनान्तरे ।

[(l 1) Ś1 अगना (for अङ्गना) —(l 2) D3 वित्रस्ता (for सत्रस्ता) Ś1 °माना सत्रस्ता किंनरी वा],
While Ñ(Ñ1 mostly illeg) V1 B1 3 4 D5 7 subst for 5

994* सकृद्राम पुन श्वश्रू तथा लक्ष्मणमेव च ।
सत्रस्ता सा तु वैदेही क्रन्दति स्म पुन पुन ।

[(l 1) V1 श्रुत्वा (for श्वश्रू) Ñ1 ततो लक्ष्मणमगना —(l 2) Ñ1 illeg B1 4 सतप्ता (for सत्रस्ता) Ñ2 D5 7 रुदति (for क्रन्दति)]
—After 5, D4 G1 M2 ins

995* सकृद्राम पुन श्वश्रूस्तथा लक्ष्मणमङ्गना ।
असकृत्तत्र वैदेही विललाप द्विजान्तिके ।

6 G3 damaged for 6^{ab} —^{a}) M1 क्लिष्ट- (for क्लिष्ट-). Ś1 ता क्लिश्यमानाभरणा —^{b}) Ś1 Ñ V1 B1 3 4 D1–3 5 7 विवर्ण(D3 °वण्ण)वदना पुन —^{c}) Ñ1 अभिदुद्राव, Ñ2 D5 7 अभ्यवर्तत, Dm1 D8 अभ्यभाषत (for अभ्यधावत) —^{d}) Ñ1 राक्षसेश्वर (for राक्षसाधिप)

7 D4 om (hapl) 7 —^{a}) D8 चेष्टतीम् (for वे°) Ś1 D1 2 पादपेषु च स(D2 म)ज्जतीम , Ñ1 B1 3 4 पादपाग्रेषु सज्जतीम् , Ñ2 V1 D5 7 पादपानेव सज्जतीम् , D3 ता पादपेषु मज्जतीम् , T2 स ता सीता विवेष्टतीम् —^{b}) Ñ1 महालता (for महाद्रुमान्) —^{d}) Dt1 D6 Ct प्राप ता, T2 M2 प्राद्रवद्, G प्रावदन् (for प्रवदन्) G3 राक्षसेश्वर (for राक्षसाधिप) Ś1 D1–3 क्रोशंती कुररीमिव, Ñ V1 B1 3 4 D5 7 क्रोशती मधुरस्वरा(Ñ2 D7 °ना, V1 B3 °न, B4 °र)

8 ^{a}) Ś1 Ñ V1 B1 3 4 D1–3 5 7 ता तु(Ś1 D1–3 एका) क्षामस्वरा दीना —^{b}) D3 निहिता (for रहिता) L(ed) तदा (for वने) —M3 damaged for 8^{cd} —^{c}) Ś1 रक्ष पतिस्ता, Ñ1 illeg (for जीवितान्ताय) —^{d}) T2 गिरि- (for [अ]-न्तक-) —After 8, Ñ2(repeats 11^{ab} in its proper place) V1 B1 3 4 D5 7 read 11

9 ^{a}) M2 गृहीतायां तु (for प्रधर्षितायां) Ñ2 V1 B1 3 4 D5 7 T1 सीतायां (for वैदेह्यां) —G3 partly damaged for ^{b} —^{d}) Ś1 महता तमसावृतं, Ñ V1 B1 3 4 D1–3 5 7 अधेन तमसावृत —After 9, Dt1 Dm1 D4 6 8 S ins

996* न वाति मारुतस्तत्र निष्प्रभोऽभूद्दिवाकर ।

10 D2 om (hapl) 10–11^{b} —^{a}) D4 G1 दीनां (for सीतां) Ś1 परामृश्य, L(ed) परामर्श- (for परामृष्टां) —^{b}) Dt1 Dm1 D6 8 G3 Ct देवो, D1 T1(sic) G1 सीता (for दीनां) —^{c}) B3 Dt1 D6 कृतकार्यम् , Ck t as in text (for कृत कार्यम्)

11 Ñ2 (repeats 11^{ab} here) V1 B1 3 4 D5 7 read 11 after 8 D2 om 11^{ab} (cf v l 10) —^{ab}) Ñ2 (first time) V1 B1 4 D1 3 हृष्टाश्च, Ñ2(second time) B3 D5 7 क्लिष्टाश्च (for प्रहृष्टा) D3 मुदिताश्च (for व्यथिताश्च) Ñ2(second time) V1 B1 3 4 D5 7 समस्ता , D3 सर्वेच (for सर्वे ते) Ś1 हृष्टाश्च परमप्रीता आसन्सर्वे महर्षय —After 11^{c}, D1 erroneously repeats 10^{bcd} —After 11, Dg1 Dt1 Dm1 D6 8 T G1 3 ins

997* रावणस्य विनाश च प्राप्त बुद्ध्वा यदृच्छया ।

—T2 cont

998* शोकेन महताविष्टा बभूवुर्गतचेतस ।,

while D1 ins after 11

G. 3 58. 18
